# समाधिराजसूत्रम् ।

# SAMĀDHIRĀJA–SŪTRAM

EDITED BY

RAI ÇARAT CHANDRA DĀS

AND

PANDIT HARIMOHAN VIDYĀBHŪSHAN

PUBLISHED BY

THE BUDDHIST TEXT SOCIETY OF INDIA

CALCUTTA—1896

---

# 梵文 月燈三昧經

---

民國貳拾九年·上海影印

*Reprinted in Shanghai, China, 1940.*

BL
1416
S25
1896a

# SAMA'DHIRA'JA SU'TRAM.

# समाधिराजसूत्रम् ।

## ॐ नमो रत्नत्रयाय ।

नमश्चन्द्रप्रभाय महाबोधिसत्त्वाय ।

अनिरोधमनुत्पन्नमनाविलमनक्षरम् ।
महायानमहं स्तोष्ये बुद्धज्ञानाभिवाञ्छया ॥
तारकं सर्व्वसत्त्वानां घोरात् संसारसागरात् ।
संस्थापकञ्च निर्व्वाणे शान्ते क्षेमे निरुत्तरे ॥
आकाशकल्पमचलं गम्भीरं शान्तमव्ययम् ।
तद्बुद्धज्ञानमसमं भक्त्या वन्दे सदादरात् ॥
अरूपमनिमित्तञ्च लक्ष्यलक्षणवर्ज्जितम् ।
प्रापकं बोधिमार्गस्य अग्रयानमहन्नतः ॥
गम्भीरोदारविपुलो धर्म्मो यत्र प्रभाष्यते ।
तद्बोधिमण्डफलदं महायानं नमाम्यहम् ॥
शाश्वतोच्छेदरहितं मन्तद्वयविवर्ज्जितम् ।
शून्यताप्रभवं शान्तं वन्दे सम्बुद्धवर्णितम् ॥
अप्रपञ्चं निरालम्बं बोधिसत्त्वैर्नमस्कृतम् ।
नमामि शिरसाजस्रं महायानमसंस्कृतम् ॥
स्तुत्वा यानमनुत्तरं निरुपमं संसारसन्तारकम्
यत्पुण्यं प्रचितं विसारि विमलं तुङ्गं मया निश्चलम् ।
सर्व्वस्तेन जनः प्रयातु चपलं सम्प्राप्य यानाधिपं
निर्व्वाणं विरजः पुरोत्तमवनं बुद्धो यथा सर्व्वविद् ॥
आर्य्यं चन्द्रप्रदीपं दशबलवृषभैर्यैरिदं सूत्रराजं
संख्यातीतैः प्रणीतैः श्रुतिहृदयपरिप्रीणनस्वात्मभाजाम् ।
सम्यक्छिस्सन्निगुढं बहुभिरपमलश्लाघनीभिः सदैव
ह्रीविन्यस्तात्मभावः प्रणतिमुपगतस्तानहं भक्तिनम्रः ॥
वर्णौघा यस्य वक्तुं मुनिवरवृषभात्मन्युपायान्ति सादम्
सर्व्वज्ञेयावबोधप्रशमिततपसोऽप्यप्रमेयास्सदैव ।
आर्य्यं चन्द्रप्रदीपं दशबलरचिताशेषसूत्राधिराजम्
तं भक्त्या भारभुग्नक्षितिनिक्षितशिराः सर्व्वकालं नमामि ॥

BL
1416
S25
1896a



येनानन्तसहस्रकल्पनयुता नाराधिता नायकाः
यश्च ज्ञानविशेषधर्म्म उदितश्चन्द्रो यथा निर्म्मलः ।
तं चन्द्रप्रभनिष्प्रपञ्चमतुलं संवर्णितं नायकैः
वन्दे सर्व्वसमाधिधर्म्मकुशलं आर्य्यं सदा भक्तितः ॥
स्तुत्वा धर्म्मस्वभावां दशबलजननीं सर्व्वबुद्धांश्च वीरान्
आर्य्यं चन्द्रप्रभञ्च जिनवरतनयं सर्व्वदेवाधिवन्द्यम् ।
पुण्यं प्राप्तं मया यत् स्थिरगगनसमन्तेन लोकोऽस्त्वशेषः
लाभीभूयाः समाधेः सततमखिलया शाक्यसिंहो यथैव ॥
समस्तसुगतोद्गीर्णसर्व्वसूत्राधिराजतः ।
आर्य्यचन्द्रप्रदीपाद्धि यथालब्धं ब्रवीम्यहम् ॥
आयान्तु देवमनुजा सद्धर्म्मजातगौरवाः ।
दुर्लभं श्रवणं ह्यस्य कल्पकोटिशतैरपि ॥

एवम्मया श्रुतमेकस्मिन् समये भगवान् राजगृहे विहरति स्म । गृध्रकूटे पर्व्वते महता भिक्षुसंघेन सार्द्धं परिपूर्णेन भिक्षुनियुतशतसहस्रेण । अशीत्या च बोधिसत्त्वनियुतैः सार्द्धं सर्व्वैरेकजातिप्रतिबुद्धैरभिज्ञाताभिज्ञातैः दशदिग्लोकधातुसन्निपतितैः धारणीसूत्रान्तगतिशतैः सर्व्वसत्त्वधर्म्मदानसन्तापकैः सहाभिज्ञाज्ञानोदाहारकुशलैः सर्व्वपारमितापरमपारमिताप्राप्तैः सर्व्वबोधिसत्त्वसमाधिसमापत्तिव्यवस्थानज्ञानकुशलैः सर्व्वबुद्धस्तुतस्तवितप्रशस्तैः । सर्व्वबुद्धक्षेत्रव्याक्रमणकुशलैः सर्व्वमारसन्त्रासनज्ञानकुशलैः सर्व्वधर्म्मकथावज्ज्ञानकुशलैः सर्व्वसत्त्वेन्द्रियपरापरज्ञानकुशलैः सर्व्वबुद्धपूजाकर्म्मसमुपादानप्रज्ञानकुशलैः सर्व्वलोकधर्म्मानुपलिप्तैः कायवाक्चित्तसमलङ्कृतैः महामैत्रीमहाकरुणासन्नाहसन्नद्धैः महावीर्य्यासंख्येयकल्पापरिखिन्नमानसैः महासिंहनादनादिभिः सर्व्वपरप्रवाद्यानभिभूतैः अवैवर्त्तिकमुद्रामुदितैः सर्व्वबुद्धधर्म्माभिषेकप्राप्तैः । तद्यथा मेरुणा च नाम बोधिसत्त्वेन महासत्त्वेन । सुमेरुणा च । महामेरुणा च । मेरुशिखरन्धिरेण च । मेरुप्रदीपराजेन च । मेरुकूटेन च । मेरुध्वजेन च । मेरुशिखरसंघज्ञानराजेन च । मेरुस्वरेण च । मेघराजेन च । दुन्दुभिस्वरेण च । रत्नपाणिना च । रत्नाकरेण च । रत्नकेतुना च । रत्नशिखरेण च । रत्नसंभवेन च । रत्नप्रभासेन च । रत्नयष्टिना च । रत्नमुद्राहस्तेन च । रत्नव्यूहेन च । रत्नजालिना च । रत्नप्रभेण च । रत्नद्वीपेन च । रतिङ्करेण च । धर्म्मव्यूहेन च । व्यूहराजेन च । लक्षणसमलङ्कृतेन च । स्वरव्यूहेन च । स्वरविशुद्धिप्रभेण च । रत्नकूटेन च । रत्नचूडेन च । दशशतरश्मिसङ्कुतार्च्चिषा च । ज्योतीरसेन च । चन्द्रभानुना च । सहचित्तोत्पादधर्म्मचक्रप्रवर्त्तिना च । शुभकनकविशुद्धिप्रभेण च । सत्रासमभयंदद्ा च नाम बोधिसत्त्वेन महासत्त्वेन । अजितबोधिसत्त्वपूर्व्वङ्गमैश्च सर्व्वभाद्रकल्पिकैर्बोधिसत्त्वैर्महासत्त्वैः मञ्जुश्रीपूर्व्वङ्गमैश्च षष्टिभिरनुपमचित्तैः भद्रपालपूर्व्वङ्गमैश्च षोडशभिः सत्पुरुषैः चतुर्महाराजपूर्व्वङ्गमैश्च चातुर्महाराजकायिकैर्देवपुत्रैः पेयालं । यावद्ब्रह्मङ्गमैश्च ब्रह्मकायिकैर्देवपुत्रैः । तदन्यैश्च महोजस्कमहेशाख्यैरुदारो-





दारैर्देवनागयक्षगन्धर्व्वासुरगरुडकिन्नरमहोरगमनुष्यामनुष्यैर्भगवान् सत्कृतो गुरुकृतो मानितः पूजितोऽर्च्चितोऽपचायितश्चतसृणामपि पर्षदां सदेवकस्य वन्दनीयः पूजनीयः सत्करणीयो गुरुकरणीयः माननीयोऽर्च्चनीयः अपचायनीयः । तत्र खलु भगवाननेकशतसहस्रया पर्षदा परिवृतः पुरस्कृतो धर्म्मं देशयति स्म । आदौ कल्याणं मध्ये कल्याणं पर्य्यवसाने कल्याणं स्वर्थं सुव्यञ्जनं केवलं परिपूर्णपरिशुद्धं पर्य्यवदातं ब्रह्मचर्य्यं संप्रकाशयति स्म । तेन खलु पुनः समयेन तस्मिन्नेव पर्षत्सन्निपाते चन्द्रप्रभो नाम कुमारभूतः सन्निपतितोऽभूत् सन्निषण्णः पूर्व्वजिनकृताधिकारः । अवरोपितकुशलमूलो जातिस्मरः लब्धप्रतिभानः महायानसंप्रस्थितः महाकरुणाभियुक्तः । अथ खलु चन्द्रप्रभः कुमारभूत उत्थायासनादेकांशमुत्तरासङ्गं कृत्वा दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणम्य भगवन्तमेतदवोचत् । पृच्छेयमहं भगवन्तं तथागतमर्हन्तं सम्यक्सम्बुद्धं कञ्चिदेव प्रदेशं स चेन्मे भगवानवकाशं कुर्य्यात् पर्षत्प्रस्तावव्याकरणाय । स एवमुक्ते भगवांश्चन्द्रप्रभकुमारभूतमेतदवोचत् । पृच्छ त्वं कुमार तथागतमर्हन्तं सम्यक्सम्बुद्धं यद्यदेव काङ्क्षस्यहं तस्य तस्यैव प्रश्नपृष्टस्य व्याकरणचित्तमाराधयिष्यामि सर्व्वज्ञोऽस्मि कुमार सर्व्वदर्शी सर्व्वधर्म्मबलवैशारद्यसुदृष्टमितामनुप्राप्तः । अनावरणविमोक्षज्ञानसमन्वागतः । नास्ति कुमार तथागतस्य किञ्चिदज्ञातं वा अदृष्टं वा अश्रुतं वा अचिन्तितं वा । अथाज्ञातकृतं वा करणेन चित्तमाराधयिष्यामि । अथ खलु चन्द्रप्रभः कुमारभूतो भगवता प्राप्तावकाशो भगवन्तं गाथाभिरभ्यभाषत ।

कथञ्च रत्नः संबुद्धः लोकनाथ प्रभङ्करः ।
लभते चिन्तियं ज्ञानं व्याकुरुष्व हितङ्करः ॥
कथञ्च रत्न नरेन्द्र सत्यवादी । नरवृषभाननदेव पूजनीया ॥
अतुलियु वरलक्षणप्रयानं । गिरिवर पृष्टविया कुरुष्व नाथा ॥
अध्याशय न पृच्छामि साध्यसम न स विद्यते ।
साक्षी न कश्चिदेष्याम अन्यत्र पुरुषोत्तमात् ॥
विपुलप्रणिधिनज्ञमस्ति छन्दश्चर्य्यय जानसि मह शाक्यसिंहः ।
न च अहू वचनचित्तको भविष्ये लघुप्रतिपत्ति भणाहि मे नरेन्द्रः ॥
कतरा सरका धर्म्मा बुद्धयाने बहूकराः ।
व्याकुरुष्व महावीर सर्व्वधर्म्माणां पारगः ॥

उपेकर मम ब्रूहि धर्म्मनाथा यथा नरुनिषे चन्द्रप्रभोतितीक्ष्णप्रज्ञः । अपगतभयभैरवो अत्र स्थान च परित्यासु करोति शीलस्कन्धे । व्यपगतमदरागदोषमहोश्चरति वचारिकशान्तदोषः ।

कथं न त्यजते शीलं कथं ध्यानं न रिञ्चति ।
कथं निषेवतेऽरण्यं कथं प्रज्ञाय वर्द्धति ॥
कथं दशबलशासने उदारे । अभिरतिं विन्दति शीलं रक्षमाणः ॥
कथं भवति अच्छिद्रशीलस्कन्धः । कथञ्च तुलेति स्वभावसंस्कृतस्य ॥



UNIVERSITY OF WASHINGTON LIBRARY SEATTLE

कथं कायेन वाचाथ विशुद्धो भोति पण्डितः ।
असंक्लिष्टेन चित्तेन बुद्धः ज्ञानं गवेषते ॥

कथं न च इति विशुद्धकायकर्म्मा कथञ्च विवर्ज्जित भोन्ति वाचदोषः कथं भवति अक्लिष्टचित्तः पुरुषवर मम पृष्टं व्याकुरुष्वेति । एवमुक्ते भगवांश्चन्द्रप्रभं कुमारभूतमेतदवोचत् । एकधर्म्मेण कुमार समन्वागतो बोधिसत्त्वो महासत्त्वः । एतान् गुणान् प्रतिलभते क्षिप्रञ्चानुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । कतमेनैकधर्म्मेण इह कुमार बोधिसत्त्वो महासत्त्वः । सर्व्वसत्त्वेषु समचित्तो भवति हितचित्तः अप्रतिहतचित्तः अविषमचित्तः अनेन कुमारैकधर्म्मेण समन्वागतो बोधिसत्त्वो महासत्त्वः । एतान् गुणान् प्रतिलभते । क्षिप्रञ्चानुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अथ खलु भगवांस्तस्यां वेलायां चन्द्रप्रभं कुमारभूतं गाथाभिर्गीतेन प्रत्यभाषत ।

एकधर्म्मं समादाय बोधिसत्त्वः प्रवर्त्तते ।
एतान् गुणान् सर्व्वं लभते क्षिप्रं बोधिञ्च बुध्यते ॥
न च क्वचित् प्रतिहन्यतेऽस्य चित्तं अप्रतिहतचित्तो यो भोति बोधिसत्त्वः ।
न च खलु जानाति न प्रदोषं लभति यथा परिकीर्त्तितां विशेषाम् ॥
समं चित्तं निषेविल्वा विपाको दर्शितः समः ।
समा पादतला भोन्ति समश्चाचारगोचरः ॥
सममविषमचित्त भावयित्वा व्यपगतदोषशीलः प्रहाणकाङ्क्षः ।
चरणावतलासमान्यभोत्ती परमप्रभास्वरशुद्धदर्शनीयाः ॥
दशदिशत विरोचि बोधिसत्त्वः स्फुरति सिरीयप्रभाय बुद्धक्षेत्रम् ।
यद् भवति मूलप्रशान्तभूमी तद् बहुसत्त्वस्ययेति बुद्धज्ञाने ॥

तत्र कुमार सर्व्वसत्त्वेषु समचित्तो बोधिसत्त्वो महासत्त्वः हितचित्तः अप्रतिहतचित्तः अविषमचित्तः इमां सर्व्वधर्म्मस्वभावसमतां विपञ्चितसमाधिं नाम प्रतिलभते । कतमश्च स कुमार स सर्व्वधर्म्मसमताविप्रचित्तो नाम समाधिः यदुत कायसम्वरो वाक्सम्वरो मनःसम्वरः कर्म्मपरिशुद्धिः आरम्बणसमतिक्रमः स्कन्धपरिज्ञा धातुसमता । आयतनापकर्षः तृष्णाप्रहाणमनुत्पादसाक्षात्क्रियावतारः । हेतुदीपना । कर्म्मफलाविप्रनाशः धर्म्मदर्शनं । मार्गभावना । तथागतसमवधानन्तीक्ष्णप्रज्ञता । सत्यानुप्रवेशज्ञानं । धर्म्मज्ञानं । प्रतिसंविदावतारज्ञानं । अक्षरपदप्रभेदज्ञानं वस्तूनां समतिक्रमः । घोषपरिज्ञा प्रमोद्यप्रतिलाभः धर्म्मप्रीत्यनुभवनता । आजनता । मार्दवता । भिक्षुकता । अशठता । अकुटिलता । विगतभृकुटिता । सुरतता । सुशीलता । साखिल्यं । माधुर्य्यं । स्मितमुखता । पूर्व्वाभिलापिता । एहीति स्वागतवादिता । अनालस्यं । गुरुगौरवम् । गुरुशुश्रूषा । उपपत्तिसन्तुष्टिः । शुक्लधर्म्मातृप्तता । आजीवविशुद्धिः । अरण्यवासानुत्सर्गः । भूमिव्यवस्थानज्ञानं । स्मृतेरविप्रणाशः स्कन्धकौशल्यं । धातुकौशल्यं । आयतनकौशल्यं । अभिज्ञासाक्षात्क्रियावतारः क्लेशापकर्षणं । वासनानुसन्धिसमुद्घातः विशेषगामिता । भावनानिष्यन्दः आपत्तिव्युत्थानकौशल्यं ।





पर्य्युत्थानविष्कम्भनमनुशयप्रहाणं । भवसमतिक्रमः जातिस्मरता । निष्काङ्क्षता । कर्म्मविपाके धर्म्मचित्तता । श्रुतपर्य्येष्टिज्ञानविज्ञता । ज्ञानतृष्णा । ज्ञानानुबोधः । आजानेयभूमिः शैलोपमचित्तता । अकम्प्यता । अचलनता । अविनिवर्त्तनीयभूमिव्यवस्थानज्ञानं । कुशलधर्म्मनिष्यन्दः पापधर्म्मजुगुप्सता । असमुदाचारता क्लेशानां । शिक्षाया अपरित्यागः समाधि-व्यवस्थानं । आशयज्ञानं सत्वेषु उपपत्तिविशेषज्ञानं । समताज्ञानं । वचनप्रतिसन्धिज्ञानं । गृहावासपरित्यागः त्रैधातुके अनभिरतिः अनवलीनता चित्तस्य । धर्म्मेष्वनभिनिवेशः । सधर्म्मपरिग्रहः धर्म्मगुप्तिः कर्म्मविपाकप्रत्ययनता । विनयकौशल्यं । अधिकरणव्युपशमः । अविवादः क्षान्तिभूमिक्षान्तिसमादानं । गतिसमता धर्म्मप्रविचयकौशल्यं धर्म्मविनिश्चयकौशल्यं धर्म्मपदप्रभेदज्ञानं । धर्म्मपदाभिनिर्हारकौशलज्ञानं । अवौनवं संभेदपरिनिर्हारकौशलज्ञानं । पूर्व्वान्तज्ञानं अपरान्तज्ञानं । प्रत्युत्पन्नज्ञानं । अध्वसमताज्ञानं । त्रिमण्डलपरिशुद्धिज्ञानं । कायावस्थानज्ञानं चित्तावस्थानज्ञानं । ईर्य्यापथरक्षणं । ईर्य्यापथविकोपनं । ईर्य्यापथविकल्पनं । ईर्य्यापथप्रासाद्धिकानामर्थानर्थकौशल्यज्ञानं । युक्तभाणिता । लोकज्ञता मुक्तत्यागिता । प्रततपाणिता । अनवगृहीतचित्तता । ह्रीव्यपत्रापिता । अकुशलचित्तजुगुप्सनता । धूतगुणानुत्सर्गः । चारित्रसमादानं । प्रियसमुदाचारिता । गुरूणां प्रत्युत्थानासनानुप्रदानता । माननिग्रहः चित्तसंप्रग्रहः । चित्तसमुत्पादज्ञानं । अथ प्रतिवेधज्ञानं । ज्ञानानुवोधः । अज्ञानविगमः चित्तप्रवेशज्ञानं । ज्ञानाविगमः चित्तस्वभावानुबोधज्ञानं । आहारनिर्हारकौशल्यज्ञानं । सर्व्वरुतज्ञानं । निरुक्तिव्यवस्थानज्ञानं । अर्थविनिश्चयज्ञानं । अनर्थविवर्ज्जनं सत्पुरुषसमवधानं । कापुरुषविवर्ज्जनं । ध्यानानां निष्पादनं । तत्र ध्यानास्वादनं । अभिज्ञाविकुर्व्वनं । नामसंकेतप्रज्ञप्तिः स्वभावावतारज्ञानं । प्रज्ञप्तिसमुद्घातः संस्कारेषु निर्वेदः संस्कारेष्वनभिलाषः असंस्कारेषूपेक्षा । लाभे अनर्थिकता । अलाभे अनवलीयनता । यशस्यनभिलाषः अयशस्याप्रतिघः प्रशंसायामननुनयः निन्दायामविषादः सुखेष्वनभिष्वङ्गः दुःखेषु अवैमुख्यं । संस्काराणामनादानता । भूतवर्णे असङ्गः अभूतवर्णे अधिवासनता गृहस्थप्रव्रजितैरसम्भवः । अगोचरविवर्ज्जनं । गोचरप्रचारः आचारसम्पत् । अनाचारविवर्ज्जनता । कुशलानामदूषणता शासनस्यारक्षणता । अल्पभाषिता मान्दवता । मन्दमदूणता । प्रतिवचनकौशल्यं । प्रत्यर्थिक निग्रहः । कालप्रतिक्रमणता । अकालविवर्ज्जनता । पृथग्जनेष्वविश्वासः । दुःखितानामपरिभवनता । तेभ्यश्च धनप्रदानाद्दरिद्रानामनवसादनता । दुःशीलेष्वनुकम्पा । हितवस्तुता । कृपाबुद्धिता धर्म्मेणानुग्रहः आमिषपरित्यागः । असंचयस्थापिता । शीलप्रशंसना दौःशील्यकुत्सनता । शीलवतामसाध्यसेवनता । सर्व्वस्वपरित्यागिता । अध्याशयनिमन्त्रणता । यथोक्तकारिता । अभीक्ष्णप्रयोगिता । सत्कृत्य प्रीत्यनुभवनता । दृष्टान्तज्ञानं । पूर्व्वयोगकौशल्यं कुशलमूलपूर्व्वङ्गमनता । उपायकौशल्यं । निमित्तप्रहाणं । संज्ञाविवर्त्तः वस्तूनां परिज्ञानं सूत्रान्ताभिनिर्हारः विनयकौशल्यं । सत्यविनिश्चयः । विमुक्तिसाक्षात्क्रियावतारः । एकांशवचनप्रत्याहरणता । यथावद्ज्ञानदर्शनानुत्सर्जनं । निष्काङ्क्षवचनता । शून्यताया आसेचनता । आनिमित्तनिषेवनं । अप्रणिहितस्वभावोपलक्षणता । वैशारद्यप्रतिलम्भज्ञानेनावभासः

शीलदृढतासमापत्त्यवतारः प्रज्ञाप्रतिलाभः। एकरोमता प्रतिष्ठानं आत्मज्ञता। अल्पज्ञातता सन्तुष्टिः चित्तस्यानाविलता। दृष्टिकृतविवर्ज्जनता। धारणीप्रतिलाभः। ज्ञानावतारः। स्थानावस्थानं प्रतिपत्तिज्ञानं। हेतुयुक्तिनयोद्धारणं मार्गप्रतिपत्तिः। सन्देशः अववादः। आनुशासनीचर्य्या। आनुलोमिकीक्षान्तिः क्षान्तिभूमिः अक्षान्तिविगमज्ञानभूमिः अज्ञानप्रहाणं। ज्ञानप्रतिष्ठानं योगाचारभूमिः बोधिसत्वगोचरः सत्पुरुषसेवना। असत्पुरुषविवर्ज्जना। सर्व्वधर्म्मस्वभावानुबोधः प्रतिवेधज्ञानं। तथागतेनाख्याता बुद्धभूमिः पण्डितैरनुमोदिता वालैः प्रतिक्षिप्ता दुर्विज्ञेया श्रावकैः अज्ञाता प्रत्येकबुद्धैः अभूमिस्तीर्थिकानां बोधिसत्वैः परिगृहीता। दशबलैरनुबुद्धा देवैः पूजनीया ब्राह्मणानां वन्दनीया शक्रैरधिगमनीया। नागैर्नमस्करणीया यक्षैरनुमोदनीयाः किन्नरैः स्तोतव्या। महोरगैः प्रशंसनीयाः बोधिसत्वैः भावनीयाः पण्डितैः पर्य्यवाप्तव्याः। धनमनुत्तरं दानं निरामिषं। भैषज्यं ग्लानानां। मुदिता शान्तचित्तानां। कोषो ज्ञानस्य। अक्षयप्रतिभानं। नयः सूत्रान्तानां। विषयः सूराणां। परिज्ञा त्रैधातुकस्य। कोलः पारगामिनां नौरोघमध्यगतानां। कीर्त्तिर्यशस्कामानां। वर्णो बुद्धानां। प्रशंसा तथागतानां स्तवो दशबलानां गुणा बोधिसत्वानां। उपेक्षा कारुणिकानां। मैत्री दोषं शमयितुकामानां। मुदिताप्रशान्तविगमः शोकस्य चित्तानां आश्वासो महायानिकानां। प्रतिपत्तिः सिंहनादनादिनां। मार्गो बुद्धज्ञानस्य मुद्रा सर्व्वधर्म्माणां। आहारिकं सर्व्वज्ञज्ञानस्य। उद्यानं बोधिसत्वानां। वित्रासनं मारसेनायाः विद्या क्षेमगामिनां। अर्थः सिद्धार्थानां। त्राणममित्रमध्यगतानां। सहधर्म्मेण प्रत्यर्थिकनिग्रहः सत्याकारो वैशारद्यानां। भूतपर्य्येष्टिर्बालानां। अनिमित्तमष्टादशानां आवेणिकानां बुद्धधर्म्माणां। अलङ्कारो धर्म्मकायस्य निराकरणं तृष्णायाः। आभरणं बुद्धपुत्राणां। रतिर्मोक्षकायानां। प्रीतिर्ज्येष्ठपुत्राणां। परिपूरि बुद्धज्ञानस्य। अभूमिः सर्व्वश्रावकप्रत्येकबुद्धानां। विशुद्धिश्चित्तस्य परिशुद्धिः कायस्य। परिनिष्पत्तिर्विमोक्षसुखानां। असंक्लेशो बुद्धज्ञानस्य। अनागमो रागस्य विगमो द्वेषस्य। अभूमिर्मोहस्य आगमो ज्ञानस्य उत्पादो विद्यायाः। प्रहाणमविद्यायाः तृप्तिविमुक्तिः साराणां तुष्टिः समाधिसाराणां। चक्षुर्द्रष्टुकामानां अभिज्ञा विकुर्व्वितुकामानां ऋद्धिरभिनिर्हर्तुकामानां धारणी श्रुतार्थिकानां स्मृतेरसम्प्रमोषः। अधिष्ठानं बुद्धानामुपायकौशल्यन्नायकानां। शुद्धेन्दुविज्ञेयं अज्ञेयमयुक्तैः दूराज्ज्ञानतः विवर्णा अक्षराणां दुर्विज्ञेयो घोषेण। आज्ञातं विज्ञैः ज्ञातं सुरतैः प्रतिविद्धमल्पेच्छैः। उद्गृहीतमारब्धकार्य्यैः दृतस्मृतिमद्भिः। क्षयो दुःखस्यानुत्पादः सर्व्वधर्म्माणामेकनयनिर्द्देशः सर्व्वभगवत्युपपत्त्यायतनानां। अयं स कुमार उच्यते सर्व्वधर्म्मस्वभावसमताविपञ्चितो नाम समाधिः। अस्मिन् खलु पुनः सर्व्वधर्म्मस्वभावसमताविपञ्चितनामसमाधिनिर्द्देशे भगवता भाष्यमाणे। अशीतिरयुतानां देवमनुष्यकायाः प्रजायाः पूर्व्वपरिकर्म्मकृतायाः अनुत्पत्तिकेषु धर्म्मेषु क्षान्तेः प्रतिलम्भोऽभूत्। सप्तवतेरानुलोमिकायाः क्षान्ते प्रतिलम्भोऽभूत्। त्रिनवतेर्नियुतानां घोषानुगायाः क्षान्तेः प्रतिलम्भोऽभूत्। परिपूर्णस्य च भिक्षुशतसहस्रस्यानुपादायास्रवेभ्यश्चित्तानि विमुक्तानि षष्टेश्च प्राणिशतसहस्राणां देवमानुषिकायाः प्रजायाः विरजो विगतमलं धर्म्मेषु चक्षुर्विशुद्धं। अशीतेश्च भिक्षुणी-





सहस्राणां अनुपादायास्रवेभ्यश्चित्तानि विमुक्तानि। पञ्चभिश्चोपासकशतैः अनागामिफलं प्राप्तं। षष्ट्या चोपासिकाशतैः सकृदागामिफलं प्राप्तं। अयञ्च त्रिसाहस्रमहासाहस्रलोकधातुः षड्विकारे कम्पितः प्रकम्पितः सम्प्रकम्पितः चलितः प्रचलितः संप्रचलितः वेधितः प्रवेधितः संप्रवेधितः क्षुभितः प्रक्षुभितः संप्रक्षुभितः रणितः प्ररणितः संप्ररणितः गर्ज्जितः प्रगर्ज्जितः संप्रगर्ज्जितः। पूर्व्वा दिगवनमति। पश्चिमा दिगुन्नमति पश्चिमा दिगवनमति पूर्व्वा दिगुन्नमति। उत्तरा दिगवनमति दक्षिणा दिगुन्नमति। दक्षिणा दिगवनमति। उत्तरा दिगुन्नमति। अन्तादवनमति। मध्यादुन्नमति। मध्यादवनमति। अन्तादुन्नमति। अप्रमेयप्रभासस्य लोके प्रादुर्भावोऽभूत्। सदेवकस्य लोकसमाजकः सब्रह्मकः सश्रमणब्राह्मणिकाप्रजायाः।। तेनावभासिता स्फुटाभूत्। इमौ च चन्द्रसूर्य्यौ एवं महर्द्धिकावेवं महानुभावावेवं महेशाख्यौ न भाशतो न तपतो न विरोचतः। या अपि ता लोकान्तरिका अन्धकारा अन्धकारतमिस्रास्ता अपि तस्मिन् समये तेनावभासेन स्फुटा अभूवन्। येऽपि तासूपपन्नाः सत्वास्तेऽप्यन्योन्यं संजानन्ति स्म। एवं चाहुः अन्यः किलायं भो सत्त्व इहोपपन्नः यावदवीचे महानरकादिति।

सर्व्वधर्म्मस्वभावसमतायाः समाधेः निदानपरिवर्त्तः प्रथमः।

---

## द्वितीयपरिवर्त्तः।

तत्र भगवान् चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म। अप्रमेयासंख्येयाः कुमार तथागता अर्हन्तः सम्यक्सम्बुद्धाः पूर्व्वं बोधिसत्वचर्य्यां चरता चक्रवर्त्तिराजभूतेन इमां समाधिचर्य्यां कांक्षता क्षिप्रञ्चानुत्तरां सम्यक्सम्बोधिमभिसम्बोद्धुकामेन इहैव गृध्रकूटपर्व्वते। स्माराम्यहं। अनेकानि कल्पकोटीनयुतशतसहस्राणि। ये मया सत्कृता गुरुकृता मानिता पूजिता अर्च्चिताः अपचायिताः। सर्व्वरत्नपुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरछत्रध्वजपताकाभिस्तुर्य्यमात्रावघरैः। वैजयन्तीभिरनेकै र्विचित्रविचित्रै र्नानारत्नमयविहारकोटीनियुतशतसहस्रव्यूहैः। तेषाञ्च मे कुमार सर्व्वेषान्तथागतानामन्तिकादयं सर्व्वधर्म्मस्वभावसमताविपञ्चितः समाधिः विस्तरेण श्रुत्वोद्गृहीतः पृष्टो धारितो वाचितः प्रवर्त्तितः। स्मरणभावनया भावितः बहुलीकृतः परेभ्यश्च विस्तरेण संप्रकाशितः तेषाञ्च कुमार तथागतानां सर्व्वपश्चिमः कुमार शालेन्द्रराजो नाम तथागतोऽर्हन् सम्यक्सम्बुद्धोऽभूत्। तस्य च कुमार शालेन्द्रराजस्य तथागतस्याशीतिनियुतशतसहस्राणि श्रावकानां बोधिसत्वानां च संघोऽभूत्। षट्सप्ततिवर्षकोटीसहस्राण्यायुःप्रमाणमासीत्। तस्य च शालेन्द्रराजस्य मे कुमार तथागतस्यार्हतः सम्यक्सम्बुद्धस्य अष्टादशवर्षकोटीसहस्राणि महापूज्योपस्थानकृतां दिव्यचन्दनमयानां रत्नमयानाञ्च विहाराणां कोटी कारिता भगवतः शालेन्द्रराजस्य कुमार तथागतस्यार्हतः सम्यक्सम्बुद्धस्य, षट्सप्ततिवर्षकोटीसहस्राण्यायुःप्रमाणमभूत्। तस्यैव च भगवतः शालेन्द्रराजस्यापि तथागतस्यापि तथागतस्यार्हतः सम्यक्सम्बुद्धस्यान्तिकादयं मया प्रव्राजित्वा

सर्व्वधर्म्मस्वभावसमताविपश्चितः समाधिः विस्तरेण चतुर्दशवर्षकोटीसहस्राणि श्रुत्वोद्गृहीतः पृष्टो धारितो वाचितः प्रवर्त्तितः स्मरणभावनया भावितो बहुलीकृतः। परेभ्यश्च विस्तरेण संप्रकाशितः। तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म। तस्मात्तर्हि कुमार इमं समाधिमाकाङ्क्षता क्षिप्रञ्चानुत्तरां सम्यक्सम्बोधिमभिसम्बोद्धुकामेन त्वया मे च सर्व्वतथागतपूजोपस्थानपरिचर्य्यास्वभियुक्तेन भवितव्यं। तत्कस्य हेतोः सर्व्वतथागतपूजोपस्थानपरिचर्य्यानिष्यन्दा हि कुमारं बोधिसत्वानां महासत्वानां न दुर्लभा भवत्यनुत्तरा सम्यक्सम्बोधिः किं मया, पुनरयं समाधिः। तस्मात्तर्हि कुमार सर्व्वतथागतपूजोपस्थान परिचर्य्यास्वपरिखिन्नमानसेन ते सदा भवितव्यं। अथ खलु भगवान् तस्याम्बेलायां चन्द्रप्रभस्य कुमारभूतस्य एतदेव पूर्व्वयोगपरिवर्त्तं भूयस्या मात्रया गाथाभिः गीतेन विस्तरेण संप्रकाशयति स्म॥ स्मरामि दशवलान् षष्ठिकोटीपूरिमभवे निवसंसु गृध्रकूटोपरि मम चरमाणु बोधिचर्य्यामिम वरशान्तसमाधि देशयिसु।

तेषां पश्चिमको आशी लोकनाथ प्रभङ्करः।
शालेन्द्रराजनामेन समया परिपृच्छितः॥
अहञ्च क्षत्रियो आसं राजश्रेष्ठो महीपतिः।
मम चो शतपुत्राणां पञ्चाभूवन्नूनकाः॥
कोटी मया विहारी शान्तस्य बुद्धस्य कारिता।
चन्दनस्य विष्ठुस्य केचिद्रत्नमयामभूत्॥
प्रियो मनापस्य बहूजनस्य भीष्मोत्तरो नाम अभूषि राजा।
अकारि बुद्धस्य विशिष्टपूजां अष्टादशावर्षसहस्रकोषः॥
जिनस्य तस्य द्विपदोत्तमस्य शालेन्द्रराजस्य विनायकस्य।
षट्षष्टतिवर्षसहस्रकोटि यो आयुस्तदा आसि अनिन्दितस्य॥
नियुतान्यशीतिः समश्रावकानां त्रैविद्यषड्भिज्ञजितेन्द्रियाणां।
क्षीणाश्रवानान्तिमदेहधारिणां संघस्तदा आसि नरोत्तमस्य॥

बहु प्रव्रजित्वा।

शालेन्द्रराजस्य जिनस्य चान्तिके चतुर्द्दशा वर्षसहस्रकोटीया।
अयं समाधिः परिपृच्छितो मया
अशीतिगाथानियुतासहस्राण्यन्ये च कोटीशतविस्तराणां।
तस्योद्गृहीताः सुगतस्य मेन्तिकादितः समाधेः परिवर्त्त एकः॥
हस्त्यास्विराभार्य्यं तथैव पुत्रा रत्नं प्रभूतन्तु तथोपभोज्यं।
न किञ्चिद् द्रव्येऽपि न त्यक्तपूर्व्वं इमं समाधिं प्रतिकाङ्क्षता वरं॥
स्मरामि बुद्धा न सहस्रकोटियो ततोत्तरे यान्ति जगद्गवालिका।
येहि स्थिहित्वा इह गृध्रकूटे अयं समाधिर्वरस्वात्त देशितः॥
सर्व्वे च शाक्यर्षभनामधेयाः सर्व्वेषश्चो राहुलनाम पुत्राः।





आनन्दनामा परिचारकश्च ................................ ।
कपिलाह्वयाः प्रव्रजिताश्च सर्व्वे अग्रयुतं कोटितः सारिपुत्राः॥
सह नाम सर्व्वे च अभूषितापि (यः) सहनायिकाचो तदलोकधातुः।
सर्व्वेऽपि चोत्पन्नकषायकाले सर्व्वे मया सत्कृतास्ते नरेन्द्राः॥
इमं चरन्ते नमि बोधिचारिकां यावन्ति वो काचि जिनान पूजा।
स मे कृता एतु समाधिमेषता प्रतिपत्तिया एष समाधि लभते॥
बहुप्रकारा प्रतिपत्तिरुक्ता गुणेषु सर्व्वेषु प्रतिष्ठितस्य।
न दुर्लभस्तस्य समाधिरेष रसेष्वगृद्धस्य अलोलुपस्य॥
कुलेष्वसक्तस्य अनीर्य्युकस्य मैत्राविहारिस्य अक्रोधनस्य।
न दुर्लभस्तस्य समाधिरेष रसेष्वगृद्धस्य अलोलुपस्य॥
सत्कारलाभेषु अनर्थिकस्य आजीवशुद्धस्य अकिञ्चनस्य।
विशुद्धशीलस्य विशारदस्य न दुर्लभस्तस्य समाधिरेषः॥
आरब्धवीर्य्यस्य अतन्द्रितस्य अरण्यवासिस्य धुतस्थितस्य।
नैरात्म्यक्षान्तिये प्रतिष्ठितस्य न दुर्लभस्तस्य समाधिरेषः॥
सदान्तचित्तस्य अनुद्धतस्य ईर्य्यापचर्य्याय प्रतिष्ठितस्य।
त्यागाभियुक्तस्य अमत्सरिस्य न दुर्लभस्तस्य समाधिरेषः॥
अनुव्यञ्जनालक्षणबुद्धधर्म्मा येऽष्टादश कीर्त्तिता नायकेन।
बलाविशारद्य न तस्य दुर्लभा धारेति यः शान्तमिमं समाधिं॥
बुद्धेन ये चक्षुषि दृष्टसत्वास्तएककालस्मि भवेयु बुद्धाः।
तेष्वेक एकस्य भवेय आयुः अचिन्तिया कल्पसहस्रकोटयः॥
तेष्वेक एकस्य शिरो भवेयुः सर्व्वे समुद्रेषु यथैव वालिः।
यावन्ति चो सर्व्वशिरा भवेयुः शिरे शिरे जिह्वतश्च पूतार्त्तिकाः॥
ते तस्य सर्व्वे भणि आनुशंसा योगाय धारेय्य इतः समाधितः।
न किञ्चिमात्रं परिकीर्त्तितं भवेत् चित्ता पुनर्याहि शिक्षित्व धारयेत्॥
धूता समादाय गुणांश्च वर्त्तते स्पृहेन्ति देवासुरयक्षगुह्यकाः।
राजा नु भोन्ती अनुयात्रु तस्य धारेति यः शान्तसमाधिदुर्दृशं॥
परिगृहीतो भवति जनेहि देवाश्च नागाः सह आनुयात्राः।
प्रत्यर्थिकस्य श्रियनो (का) सहन्ति धारेति यः शान्तसमाधिदुर्लभं॥
अनन्तु तस्य प्रतिभानुभान्ति अनन्तसूत्रान्तसहस्र भाषते।
न तस्य विघ्ना नु कदाचि भोन्ति धारेति यः शान्तमिमं समाधिं॥
द्रक्ष्यन्ति बुद्धं अमिताभनायकं सुखावति चाप्यथ लोकधातुं।
ये पश्चिमे कालि महाभयानके समाधि श्रुत्वा इमु धारयेयुः॥
प्रकाशयित्वा इमु आनुशंसा अधेषते शास्त स्वयं स्वयम्भू।

परीत्तृतस्य मम पश्चिमकालो समाधि धारेयुरिमं विशुद्धं ॥
ये केचि बुद्धास्त्रिंशता सुनिर्वृता अनागता येऽपि च प्रत्युत्पन्नाः ।
सर्वे जिना अत्र समाधिशिक्षिता बुध्यन्ति बोधिं विरजामसंस्कृतं ॥

शालेन्द्रराजपूर्वयोगपरिवर्त्तो द्वितीयः ॥

---

## तृतीयपरिवर्त्तः ।

तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म । तस्मात्तर्हि कुमार यो बोधिसत्वो महासत्वः आकाङ्क्षति तथागतस्यार्हतः सम्यक् सम्भूतगुणवर्णं संप्रकाशयितुं । नोचार्थतो वा व्यञ्जनतो वा पर्य्यादातुं गणं सर्वञ्च मे वचनं । बुद्धपरिगृहीतं निश्चरेदिति । तेन कुमार बोधिसत्वेन महासत्वेन । सर्वसत्त्वानामर्थायायं समाधिरुद्ग्रहीतव्यः पर्य्यवाप्तव्यः धारयितव्यः वाचयितव्यः प्रवर्त्तयितव्य उपदेष्टव्यः स्वाध्यातव्यः अरणाभावनया भावयितव्यो बहुलीकर्त्तव्यः परेभ्यश्च विस्तरेण संप्रकाशयितव्यः । कतमेच कुमार तथागतस्य भूता बुद्धगुणाः । इह कुमार बोधिसत्वो महासत्वः अरण्यगतो वा वृक्षमूलगतो वा अभ्यवकाशगतो वा शून्यागारमध्यगतो वा इति प्रतिसंशिक्षते । इत्यपि स भगवान् तथागतोऽर्हन् सम्यक् सम्बुद्धो विद्याचरणसम्पन्नः सुगतो क्वचिदनुत्तरः पुरुषदमसारथिः शास्ता देवानाञ्च मनुष्याणाञ्च बुद्धो भगवान्निष्पन्दः स तथागतः पुण्यानामभिप्रणाशकुशलमूलानां । अलंकृतं क्षान्त्याः आगमः पुण्यनिधानानां । चित्रितोऽनुव्यञ्जनैः कुसुमितो लक्षणैः प्रतिरूपो गोचरेण । अप्रतिकूलो दर्शनेन । अभिरतिः श्रद्धाधिमुक्तानां अनभिभूतः प्रज्ञायाः अनवमर्द्दनीयो बलैः शास्ता सर्वसत्वानां । पिता बोधिसत्वानां राजा आर्य्यपुद्गलानां । सार्थवाहः आदिकर्म्मिकानां । अप्रमेयो ज्ञानेन अनन्तः प्रतिभानेन विशुद्धः स्वरेण । आस्वादनीयो घोषेण । आसेचनो रूपेण अप्रतिसमया येन अलिप्तः कामैः । अनुलिप्तो रूपैः । असंसृष्टः आरूप्यैः विमुक्तो दुःखेभ्यः विप्रमुक्तः स्कन्धैः विसंयुक्तो धातुभिः संवृत्तः आयतनैः प्रतिच्छिन्नो ग्रन्थैः विमुक्तः परिदाहैः परिमुक्तस्तृष्णया ओघादुत्तीर्णः परिपूर्णो ज्ञानेनाप्रतिष्ठितोऽतीतानागतप्रत्युत्पन्नानां बुद्धानां भगवतां । ज्ञाने अप्रतिष्ठितो निर्व्वाणे स्थितो भूतकोट्यां स्थितः सर्वसत्वोल्लोकनीयायां भूमौ । इमे ते कुमार तथागतस्य भूता बुद्धगुणाः । एभिर्बुद्धगुणवर्णैः समन्वागतो बोधिसत्वो महासत्वः इमां समाधिमागम्य अनुच्छेदेन प्रतिभानेन तथागतस्यार्हतः सम्यक्सम्बुद्धस्य भूतं बुद्धगुणवर्णं संप्रकाशयन्तः चार्थतो व्यञ्जनतश्च पर्य्यादानाद् गच्छति । सर्वं चास्य वचनं बुद्धपरिगृहीतन्निःसरति । अथ खलु भगवान् तमेवार्थमुद्योतयमानस्य चन्द्रप्रभस्य कुमारभूतस्य भूयस्या मात्रया तस्यां वेलायां गाथाभिर्गीतेन विस्तरेण संप्रकाशयति स्म ।





न सुकर जिनवर्णं संविवक्तुं बहुमपि कल्पसहस्रभाषमाणैः ।
तथ तु न समुदानिराजिनेभी इम वर शान्तसमाधिमेषमाणैः ॥
परम अभिरूपदर्शनीयाः कन्या अलङ्कृतगात्रप्रेमणीयाः ।
दत्तेषु रिम्र दीनमानसना इम वर शान्तसमाधिमेषतो मे ॥
तथमपि धनधान्यदासिदासं तथ मणिमुक्तिसुवर्णरूप्यकञ्च ।
त्यक्तुमपि अदीनमानसेना इम वर शान्तसमाधिमेषतो मे ॥
मणिरतनविचित्रमुक्तहाराःरुचिरपि नन्दने हर्षसुवर्णसूत्रं ।
त्यक्तुमपि पुराणकेषु ++ इम वर शान्तसमाधिमेषतो मे ॥
अपरिमित अनन्तकल्पकोटेः परमसुगन्धिकवासिकाश्च ।
त्यक्तुमपि जिना न चेति येषु परमनिरुत्तरु चिन्तु स जनित्वा ॥
तथपि च मयि दन्तु धर्म्मज्ञानं पर्षगतेन जनित्व चित्रकारणं ।
न च मम समुत्पन्न जातु चित्त मियमज्ञातु ददित्व धर्म्मदानं ॥
न च मम इति आग्रहो अभूषी प्रियतम तेन आत्मनापि भोक्तुं ।
ददमि अहू प्रभूतदयधर्म्मं सद मम चित्तं लभेय बुद्धज्ञानं ॥
अखिलमधुरसंविभागशीलः स्मितवदनः श्रुतधारस्निग्धघोषः ।
सुमधुरवचनः प्रियो बहूनां जन ममवि अदृष्टदर्शनेन ॥
क्षणमपि च न मत्सरी भवामि भवनियुतेषु न जातु ईर्ष्य आशीत् ।
सह अहू परितुष्ट विन्दुपाते सकलनिमन्त्रणवर्ज्जिताश्च शेषाः ॥
बहुश्रुत श्रुतधारिये भवन्ती गाथ इतो धारयेश्चतुष्पदस्मि ।
ये मयि सदसत्कृता अभूवं परमनिरुत्तर प्रेम संजनित्वा ॥
बहु विविधमनन्तदानदत्तं तथपि च रक्षितु शीलु दीर्घरात्रं ।
पूजा बहुकृता विनायकेषु इम वर शान्तसमाधिमेषतो मे ॥
पृथु विविध अनन्त लोकधातु मणिरतनैः परिपूर्य्य दान दद्यात् ।
इतु धरयि समाधितश्च गाथामिमु तनुपुण्य विशिष्यते उदारं ॥
यावत पृथु केचिदस्ति पुष्पा स्तथरिव गन्धमनोरमा उदारा ।
तेहि जिनु महेष्यपुण्यकामो बहुमपि कल्प अनन्त अप्रमेयां ॥
यावत पृथु केचिदस्ति वाद्यास्तथ बहुभोजन अन्नपान वस्त्राः ।
ते हि जिनु महेष्यपुण्यकामो विकल्प अनन्त अनन्त अप्रमेयां ॥
यश्च ननु जिनस्य बोधिचित्तं अनुजिनु मेषि स्वयम्भुधर्म्मराजः ।
गाथमितु धरन् समाधितैका मिमु तनुपुण्य विशिष्यते उदारं ॥
यावत पृथुगङ्गवालिका स्युस्तावत कल्पभाणय्य आनुशंसां ।
न च परिक्षयु शक्क कीर्त्यमानैर्बहु तनुपूर्णं समाधि धारयित्वा ॥

तस्मात् श्रुत्वा श्रुत्वेति बुद्धाना मानुशंसां सुभद्रकां ।
क्षिप्रमुद्दिशथो धारां समाधिं बुद्धवर्णितं ॥
त्रिसप्तति बुद्धकोट्यः पूर्व्वजातिषु सत्कृताः ।
सर्व्वे हि तेहि बुद्धेहि इदं सूत्रे प्रकाशितम् ॥
महाकरुणभोतारं इदं सूत्रं निरुच्यते ।
बहू अत्यस्मि शिक्षित्वा बुद्धधर्म्मा न दुर्लभाः ॥
भेष्यन्ते पश्चिमे काले निर्वृते लोकनायके ।
बहू असंयता भिक्षू बहू श्रुत्य अनर्थिकाः ॥
शीलस्य वर्णं वक्ष्यन्ति शीलेन च अनर्थिकाः ।
समाधिवर्णं वक्ष्यन्ति समाधिय अनर्थिकाः ॥
प्रज्ञाय वर्णं वक्ष्यन्ति प्रज्ञाय च अनर्थिकाः ।
विमुक्तिवर्णं वक्ष्यन्ति विमुक्ताय अनर्थिकाः ॥
चन्दनस्य यथा कश्चिद्भाषेत पुरुषो गुणान् ।
ईदृशं चन्दनं नाम गन्धजातं मनोरमम् ॥
अथान्यः पुरुषः कश्चिदेवं पृच्छेत तं नरम् ।
गृहीतं चन्दनं किञ्चिद्यस्य वर्णं प्रभाषसे ॥
स तन्नरं प्रतिव्यायाद्गन्धवर्णं ब्रवीमि कम् ।
जीविकां येन कल्पेमि तं च गन्ध भवेत् स्वहम् ॥
एवं योगेष्ययुक्तानां शीलवर्णेन जीविका ।
पश्चिमे भेष्यते काले शीलं चैषां न भेष्यते ॥
एवं योगेष्ययुक्तानां समाधिवर्णेन जीविका ।
पश्चिमे भेष्यते काले समाधिश्चैषां न भेष्यते ॥
एवं योगेष्ययुक्तानां प्रज्ञावर्णेन जीविका ।
पश्चिमे भेष्यते काले प्रज्ञा चैषां न भेष्यते ॥
एवं योगेष्ययुक्तानां विमुक्तिवर्णेन जीविका ।
पश्चिमे भेष्यते काले विमुक्तिश्चैषां न भेष्यते ॥

यथ पुरुष दरिद्र कश्चिदेव स च परिभूतु भवेत् महाजनस्य ।
स च लभति निधानु पश्चिकाले धनकरि ज्ञातिजनो नु सत्करेया ॥
एवं मयु न समाधि याव लब्धो न च महुमतो भवतीह बोधिसत्त्वः ।
मरुमनुजकुम्भाण्डराक्षसानो न यथ पुरुषः स दरिद्र अर्थहीनः ॥
यद पुनरियं लब्ध भोति शान्तभूमि मतुरिय धर्म्मुनि नु पण्डितेन ।
मरुमनुज सपृहं जनेन्ति तत्र स च धनु देहि निरुत्तरं प्रजानाम् ॥
तस्य इमु श्रुणित्व आनुशंसां परमप्रणीतये किर्त्तितां जिनेन ।





सर्व्वं जहिय स तत्र लाभसौख्यं इमु वरमुद्दिशथा समाधि शान्तम् ॥
ये केचि बुद्धा हि शता सुनिर्वृता अनागता येऽपि च प्रत्युत्पन्नाः ।
सर्व्वं च शिक्षित्व इह समाधौ बोधिं विबुद्धा अतुलामचिन्त्याम् ॥
चन्द्रप्रभकुमार हृष्टचित्तः पुर तु जिनस्य स्थिहित्व वाचभाषी ।
अहं पुरुषवरस्य निर्वृतस्यासुकिसरि कालि इदत्व रिष्टिसूत्रम् ॥
कायु अहत्य जित्व जीवितं चो तथपि च सौख्यये केचिदस्ति लोके ।
तत्र अहो महू महाभयस्मि काले इमु वरशान्तसमाधि धारयिष्ये ॥
मह करुणजानिलसत्त्वकायभू दुःखितसत्त्व अनाथप्राय दृष्ट्वा ।
तेष्वहमुपसंहरित्व मैत्रीमिमु वरशान्तसमाधि देशयिष्ये ॥
पञ्चशत अनून तस्मि काले य उच्छ्रित तत्र समाधिधारकाणां ।
पूर्व्वङ्गमुक्त मारुतेषु आशीरिह वर सूत्रपरिग्रहे उदारे ॥

बुद्धानुस्मृतिपरिवर्त्तः तृयीयः ॥

---

## चतुर्थपरिवर्त्तः ।

अथ खलु चन्द्रप्रभः कुमारभूत उत्थायासनादेकांशमुत्तरासङ्गं कृत्वा दक्षिणजानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणम्य भगवन्तं तथागतमर्हन्तं सम्यक्सम्बुद्धं कश्चिदेव प्रदेशः स चेत् मे भगवानवकाशं कुर्य्यात् पृष्टप्रश्नव्याकरणाय ॥ एवमुक्ते भगवान् चन्द्रप्रभं कुमारभूतमेतदवोचत् । पृच्छ त्वं कुमार तथागतमर्हन्तं सम्यक्सम्बुद्धं । यद्यदेवाकाङ्क्षसि नित्यकृतस्ते कुमार तथागतेनावकाशः । एवमुक्ते चन्द्रप्रभः कुमारभूतो भगवता कृतावकाशो भगवन्तमेतदवोचत् । समाधिः समाधिरिति भगवन्नुच्यते कतमस्यैतद्धर्म्मस्याधिवचनं समाधिरिति । एवमुक्ते भगवांश्चन्द्रप्रभं कुमारभूतमेतदवोचत् ॥ समाधिः समाधिरिति कुमारोच्यते यदुत चित्तस्य निध्यप्तिः अनुपपत्तिरप्रतिसन्धिः प्रतिसन्धिज्ञानं । अपहृतभावता तथागतज्ञानं बुद्धवृषभिता रागचिकित्सा । दोषव्युपशमः सादस्य प्रहाणं युक्तयोगिता अयुक्तविवर्ज्जनता कुशलधर्म्मच्छन्दः संसारान्योत्कुकामता । अध्याशयप्रतिपत्तिः जागरिकाया आसेवनं प्रहाणस्यानुत्सर्गः आरक्षा शुक्लधर्म्माणामुपपत्तिष्वविश्वासः अनभिसंस्कारः कर्म्मणामाध्यात्मिकानामायतनानां मनसिकारः वाह्यानामायतनानामसमुदाचारः आत्मनोऽनुत्कर्षणं । परेऽपापमनाः कुशलेषणाध्यवसानं पृथग्जनेषु विश्वासः शीलस्य निष्यन्दः दुरासदेवा महौजस्कता । आत्मज्ञानं । अचपलता । ईर्य्यापथसम्पदवस्थानं । अव्यापादः । अपासष्यबलेष्वनुत्पीड़ा । मित्राणामनुरक्षणा गुह्यमन्त्राणामारक्षणा । अविहिंसा शीलवता मनुत्पीड़नता सलक्षवचनता सर्व्वत्रैधातुके अनिश्रितता । सर्व्वधर्म्मेषु शून्यतानुलोमिकी

क्षान्तिः । सर्व्वज्ञज्ञाने तीव्रच्छन्दता । समाधिः समाधिरिति कुमारोच्यते या एतेष्वेवं रूपेषु धर्म्मेषु प्रतिपत्तिर्न विप्रतिपत्तिः । अयं स कुमार उच्यते समाधिरिति । अथ खलु भगवान् तमेव सर्वधर्म्मस्वभावसमताविपञ्चितसमाधिमुद्भाव्य चन्द्रप्रभकुमारस्य तस्यां वेलायां भूयस्या मात्रया गाथाभिर्गीतेन विस्तरेण संप्रकाशयति स्म ।

अपावृत मे अमृतस्य द्वारे मोचचितो धर्म्मस्वभावा यादृशा ।
निदर्शिता मे उपपत्ति यादृशी प्रकाशिता निर्वृति सानुशंसा ॥
विवर्ज्जनीया सदपायमित्राः कल्याणमित्राश्च निसेवितव्या ।
वनेषु वस्तव्युगणं जहित्वा मैत्रं च चित्तं सद भावनीयं ॥
शुद्धश्च शीलं सद रक्षितव्यं श्रुतेषु तुष्टिः सद विन्दितव्या ।
त्यागश्च प्रज्ञा च निसेवितव्या न दुर्लभो एष समाधि भेष्यति ॥
ततो लभित्वा इमु शान्तभूमी यस्मा अभूमी पृथु श्रावकाणाम् ।
प्रत्यक्षभूता सुगतस्य धर्म्मा प्रलप्स्यथा बुद्धगुणा न चिन्तियाः ॥
दृष्ट्वा नरां भाजनशुद्धिगतां तां बोधिचित्तस्मि शमादयः ।
अनुत्तरे ज्ञानि प्रतिष्ठिहित्वा न दुर्लभो एष समाधिराजः ॥
यस्यार्थि ईर्ष्या पुनसंभोजनेर्या आहारिनिष्यन्दि हि प्रत्यवेक्षते ।
पर्य्येष्टितश्चोपरिभोगतश्च न दुर्लभो एष समाधि भेष्यति ॥
समाधिराजो यदि वैष शून्यता विशुद्धिशीला न युध्नि तिष्ठति ।
स्वभावतो धर्म्म सदा समाहिता वाला न जानन्ति अयुक्त योगाः ॥
येषामयं सन्ति समाधिरिष्टो न तेषु जाता नयु बुद्ध तिष्ठति ।
सदानुपश्यन्ति नरानु सुत्तमं इमानि सेवित्व प्रशान्तभूमिं ॥
आकारतो यस्य रते तथागतां स भोति शान्तेन्द्रियशान्तमानसः ।
अभ्रान्तचित्तः सततं समाहितः श्रुतेन ज्ञातेन च सागरोपमः ॥
अस्मिन् समाधौ हि प्रतिष्ठिहित्वा यश्च क्रमैश्च क्रमि बोधिसत्त्वः ।
स पश्यता बुद्धसहस्रकोटिया तदुत्तरे यान्ति कगङ्गवालिकाः ॥
उन्मादु गच्छेय नरस्य चित्तं यो बुद्धधर्म्माण प्रमाण गृह्णीयात् ।
नैवाप्रभाणस्य प्रमाणमस्ति अचिन्तिया सर्व्वगुणैर्हि नायकाः ॥
नमोऽस्ति सत्वो दशसु दिशासु यो लोकनाथेन समः कुतोत्तरि ।
सर्व्वे हि सर्वज्ञगुणैरुपेतामकाङ्क्षता लप्स्यथ बुद्धज्ञानं ॥
सुवर्णवर्णेन समुच्छ्रयेण समन्त प्रासादिक लोकनाथ ।
अन्यत्र आरम्बणि चित्त वर्त्तते समाहितः सोच्यति बोधिसत्त्वः ॥
असंस्कृतं संस्कृतु ज्ञात्व विज्ञो निमित्तसंज्ञाय विभाति कायः ।
स आनिमित्तं भवति प्रतिष्ठितः प्रजानती शून्यक सर्वधर्म्माः ॥
यो धर्म्मकाये भवति प्रतिष्ठितो अभाव जानाति स सर्वभावं ।





अभावसंज्ञाय विभावितात न रूपकायेन जिनेन्द्र पश्यति ॥
आरोचयामि प्रतिवेदया वा यथायथा वेद्मु लुवितक्षये नरः ।
तथा तथा भवति तन्निम्नचित्तस्तद्वीविके हि तन्निश्रितेहि ॥
एवं मुनीन्द्र स्मरतो नरस्य आकारतो ज्ञान तु अप्रमेयतः ।
अनुस्मृतिं भावयतः स दैवतं तं निम्नचित्तं भवतीव प्रायं ॥
सचक्रसंस्थाननिषद्यमाश्रितो आकाङ्क्षते पुरुषवरस्य ज्ञाने ।
आकाङ्क्षमाणः प्रतियेति बोधये भविष्यहं लोकि निरुत्तरो जिनः ॥
स बुद्ध संजानति बुद्ध पश्यते बुद्धो नचो धर्म्मत प्रत्यवेक्षते ।
इहैं समाधिं प्रतिष्ठिहित्वा नमस्यते बुद्ध महानुभावं ॥
कायेन चित्तेन च सन्नमासो बुद्धा न वर्णम्भणती अभीक्ष्णं ।
तथाहि सो भावितचित्तसन्तती रात्रिन्दिवम्पश्यति लोकनाथं ॥
यथापि सो भोति गिलान आतुरः प्रवर्त्तते वेदन मारणान्तिका ।
न बुद्धमारभ्य संस्मृतिः प्रमुष्यते न वेदनाभिरनुसंहरीयति ॥
तथैव तेनो विविनित्व ज्ञाना अनागता आगतधर्म्मशून्यता ।
सो तादृशे धर्म्मनये प्रतिष्ठितो न खिद्यते चिन्तु चरन्तु चारिकां ॥
तस्माच्छृणित्वा इमु आनुशंसां जनेथ छन्द अतुलाय बोधये त् ।
मा पश्चिकाले परितापु भेष्यती सुदुर्लभं सुगतवराण दर्शनम् ॥
अहञ्च भाषेय प्रणीतधर्म्मं यूयञ्च श्रुत्वा न समाचरेथा ।
भैषज्य वस्त्रञ्च गृहीत्व आतुरो अपनेतु व्याधिन्न प्रभोति आत्मनः ॥
तस्माद्विधिज्ञेन विचक्षणेन इमं समाधिं प्रतिकाङ्क्षता सदा ।
शीलं श्रुतं त्यागु निषेवितव्यं न दुर्लभो एष समाधि भेष्यति ॥

समाधिपरिवर्त्तः चतुर्थः ॥

---

## पञ्चमपरिवर्त्तः ।

तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म । तस्मात्तर्हि कुमार बोधिसत्वेन महासत्वेन इमं समाधिमाकाङ्क्षता क्षिप्रञ्चानुत्तरां सम्यक्सम्बोधिमभिसम्बोद्धुकामेनादीप्तशिरश्चैलोपमेन चित्तेन माता पितृ दुहितृ ज्ञाति सालोहित सम्बन्धि वान्धवान् भार्य्यादींश्च अग्निवदपहाय सर्वराजैश्वर्य्यसुखांश्च श्वेठपिण्डकमुत्सृज्याभिनिष्क्रान्तगृहावासेन भवितव्यं अरण्याभिमुखेन च । तत्कस्य हेतोः । अभिनिष्क्रान्तगृहावासस्य हि कुमारारण्याभिमुखस्य च

बोधिसत्त्वस्य महासत्त्वस्य न दुर्लभा भवत्यनुत्तरा या सम्यक्सम्बोधिः किं मे पुनरयं समाधिः। तस्मात्तर्हि कुमार पुत्रमित्रज्ञातिदुहितृसालोहितसम्बन्धिबान्धवान् भार्य्यादींश्च यावकदुत्सृज्य। सर्वराज्यैश्वर्य्यसुखांश्च स्वपिण्डकवदपहायाभिनिष्क्रान्तो गृहावासादरण्याभिमुखश्च भविष्यामीत्येवं त्वया कुमार सदाशितव्यं। तदानेनापि ते कुमार पर्य्यायेणैवं वेदितव्यं। भूतपूर्वं कुमारातीतेऽध्वनि असंख्येये कल्पे असंख्येयतरविपुले अप्रमेये अचिन्त्ये अपरिमाणे। यदा शीतेन कालेन तेन समयेन भगवान् घोषदत्तो नाम तथागतोऽर्हन् सम्यक्सम्बुद्धो लोक उत्पादि विद्याचरणसम्पन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानाञ्च मनुष्याणाञ्च बुद्धो भगवान् तेन खलु पुनः कुमार कालेन तेन तस्य घोषदत्तस्य तथागतस्यार्हतः सम्यक्सम्बुद्धस्याशीतिश्रावकौघः प्रथमः सन्निपातोऽभूत्। सर्व्वेषामर्हतां द्वितीयः श्रावकसन्निपातः। सप्ततिकौघोऽर्हतामभूत्। द्वितीयः सन्निपातः षष्ठिः श्रावकौघोऽर्हतामभूत्। अपरिमाणाश्च बोधिसत्वा महासत्वाः सकर्म्मपरिग्राहका अभूवन्। तेन खलु पुनः समयेन तस्य भगवतो घोषदत्तस्य तथागतस्यार्हतः सम्यक् सम्बुद्धस्य चत्वारिंशद्वर्षसहस्राण्यायुः प्रमाणमभूत्। अयञ्च जम्बूद्वीपः यद्धश्चोऽभूत् ह्यीतश्च क्षेमश्च सुभिक्षश्च रमणीयश्चाकीर्णबहुजनमनुष्यश्चाभूत्। तेन खलु पुनः समयेन अस्मिंश्च जम्बूद्वीपे द्वौ राजानौ बभूवतां। दृढवलश्च नाम महावलश्च तत्रैको राजा अर्द्धजम्बूद्वीपस्य परिभुंक्ते द्वितीयोऽप्यर्द्धस्य परिभुंक्ते। मध्यस्य स्फीतस्य क्षेमस्य सुभिक्षस्य रमणीयस्यावकीर्णबहुजनमनुष्यस्य तेन च कुमार कालेन तेन समयेन राज्ञो महावलस्य विजिते भगवान् घोषदत्तः तथागतोऽर्हन् सम्यक्सम्बुद्ध उत्पन्नोऽभूत्। इति हि कुमार राज्ञा महावलेन स भगवान् घोषदत्तस्तथागतोऽर्हन् सम्यक्सम्बुद्धः परिपूर्णवर्षसहस्रमुपनिमन्त्रितोऽभूत्॥ सार्द्धं बोधिसत्त्वसंघेन भिक्षुसंघेन च कल्पिकेन परिभोगेनानवद्येनाचीवरपिण्डपात्रशयनासनग्लानप्रत्ययभैषज्यपरिष्कारेण तेन च कुमार कालेन तेन समयेन तस्य भगवतो घोषदत्तस्य तथागतस्यार्हतः सम्यक्सम्बुद्धस्य स बोधिसत्वसंघस्य चोत्सवदं लोकसत्कारमकार्षुः। तेच ब्राह्मणगृहपतयो भगवतो घोषदत्तस्य तथागतस्यार्हतः सम्यक्सम्बुद्धस्य लाभसत्काराद्युद्युक्ता अभूवन्। यदुत लोकामिषपूजया राज्ञ एव महावलस्यानुशिक्षमाणरूपाः। इति हि कुमार तस्य भगवतो घोषदत्तस्य तथागतस्यार्हतः सम्यक्सम्बुद्धस्य एतदभूत्। परिहीयन्ते एते मे सत्त्वाः शीलपोषधसमादानतः तथागतानामुपसंक्रमतः तथागतपर्य्युपासनतः ब्रह्मचर्य्यवीसतः प्रव्रज्यायाः। उपसंपदतः शिक्षाभावतश्च तत्र ते सत्त्वास्तदन्तरं सुखगुरुकास्तत् कस्य हेतोः तथा हि तदनुत्तरसुखमिदं यदुत लोकामिषपूजायाः तत्र ते सत्त्वा दृष्टधर्म्मगुरुकाः सर्व्वरागगुरुकाश्च। यदुत स्वर्गलोकाध्यालम्बनतया नात्यन्तनिष्ठाकुशलमूलाय। तत्र कुमार कतमं तदत्यन्तनिष्ठं कुशलमूलं यदुतात्यन्तविशुद्धिः। अत्यन्तब्रह्मचर्य्यवासः। अत्यन्तपर्य्यवसानं। अत्यन्तनिष्ठकुशलमूलं। यत्त्वहमेतेषां सत्त्वानां तथा धर्म्मं देशयेयं। तथानुत्तरया धर्म्मपूजया धर्म्मप्रतिपत्त्या च तथागतं पूजयेयुः। अथ खलु कुमार घोषदत्तस्तथागतोऽर्हन् सम्यक्सम्बुद्धस्तस्यां वेलायां राज्ञो महावलस्य तेषाञ्च ब्राह्मणगृहपतीनां सर्व्वजनाभिप्राय इमां गाथामभाषत।





दान प्रदानेन अन्योन्यसेवतां तेषां न्यमन्यस्ति न भोति गौरवं।
न तादृशी सेवन वर्णयन्ति बुद्धा विदूयेष प्रहीणवासना॥
ते तादृशा भोन्ति नराः सुसेविताः ये धर्म्म देशेन्ति हिताय प्राणिनां।
तेषां न्यमन्यस्ति अभेद्य प्रेम संसारकोटीनि न सक्नु भिन्दितुम्॥
लोका मिषेणो न च सेवतां नृणां सर्व्वेष सादृष्टिकु भोति अर्थः।
निरामिषं धर्म्म निषेवितं हि महान्तु अर्थो भवती नराणां॥
निरामिषं चिन्तु उपस्थयित्वा निरामिषं धर्म्म प्रकाशयित्वा।
निरामिषं येष भवेत प्रेम ते तादृशाः क्षिप्र भवन्ति बुद्धाः॥
न जातु कामान् प्रतिषेवमानः पुत्रेषु दारेषु जनित्व तृष्णां।
गृहञ्च सेवन्तु जुगुप्सनीयं अनुत्तरां प्राप्स्यति साग्रबोधिं॥
ये काममर्जन्ति यथाग्निकर्षं पुत्रेषु दारेषु जनित्व तृष्णां।
उत्रस्तरोहादथ निष्क्रमन्ति न दुर्लभा तेष्वियमत्र बोधिः॥
न कश्चि बुद्धः परिमेण आसी अनागतो भेष्यति योऽवतिष्ठते।
येहि स्थितैरेवमगारमध्ये प्राप्ता इयं उत्तममग्र बोधिम्॥
प्रहाय राजा यथ खेटपिण्डं वसेदरण्येषु विवेककामः।
क्लेशान् प्रहाय विनिहत्य मारम् बुध्यन्ति बोधिम्विरजामसंस्कृतां॥
यो बुध्यवीरान् यथ गङ्गवालिका उपस्थिहैय्या बहुकल्पकोटियः।
यश्चो गृहीतः परिखिन्नमानसा अभिनिष्क्रमेय्या अयु तत्र उत्तमः॥
अन्नेहि पानेहि च चीवरेहि पुष्पेहि गन्धेहि विलेपनेहि।
नाप्रस्थिता भोन्ति नरोत्तमा जिना यथ प्रव्रजित्वा चरियाण धर्म्मं॥
यश्चैव बोधिं प्रतिकाङ्क्षमाणः सत्त्वार्थ निर्विण्णु कुसंस्कृतातः।
अरण्याभिमुख सप्तपदानि प्रक्रमेदयन्ततः पुण्यविशिष्ट भोति॥

अश्रौषीत् खलु पुनः कुमारो राजा महावलो भगवता घोषदत्तेन तथागतेनार्हता सम्यक्सम्बुद्धेन इमामेवंरूपां प्रवर्त्तितां नैष्कर्म्मप्रतिसंयुक्तां कथं श्रुत्वा च विमृशति। यथाहं भगवतो भाषितस्यार्थमाजानामि। न भगवान् दानपारमितां वर्णयति। शीलपारमितां भगवान् संवर्णयति। अत्यन्तनिष्ठां भगवान् संवर्णयति। अत्यन्तविशुद्धिं अत्यन्तब्रह्मचर्य्यावासं अत्यन्तनिर्व्वाणं संवर्णयति तस्यैतदभूत्। नेदं सुकरमगारमध्यावासता अनुत्तरा धर्म्मप्रतिपत्तिः सम्पादयितुं अथोवा अनुप्राप्तुं। परिहीणोऽस्म्यनुत्तराया धर्म्मप्रतिपत्तितः यथाहं केशश्मश्रूण्यवतार्य्य काषायाणि वस्त्राणि परिधाय सम्यगेव श्रद्धया आगारादनागारिकां प्रव्रज्येयं इति हि कुमार राजा महावलः सार्द्धमशीत्या ब्राह्मणगृहपतिशतसहस्रैः परिवृतः पुरस्कृतो येन भगवान् घोषदत्तनामातथागतोऽर्हन् सम्यक्सम्बुद्धः तेनोपसंक्रामदुपसंक्रम्य तस्य भगवतः पादौ शिरसाभिवंवाद्य तं भगवन्तन्त्रिः प्रदक्षिणीकृत्य एकान्तेऽस्थात्। अथ खलु कुमार भगवान् घोषदत्तस्तथागतोऽर्हन् सम्यक्सम्बुद्धः राज्ञो

महाबलस्याध्याशयं ज्ञात्वा इमं सर्व्वधर्म्मस्वभावसमताविपञ्चितं समाधिं देशयते । अथ खलु कुमार राजा महाबलः इमं समाधिं श्रुत्वा तुष्ट उदग्र आत्तमनाः प्रमुदितः प्रीतिसौमनस्यजातः केशश्मश्रूण्यवतार्य्य काषायाणि वस्त्राणि परिधाय सम्यगेव श्रद्धया आगारादनगारिकां प्रव्रजितोऽभूत् । स तथा प्रव्रजित एव सन्निमं समाधिमुद्गृहीतं वा उद्गृह्य पर्य्यवाप्य धारयित्वा वाचयित्वा भावनायोगमनुयुक्तैर्व्यहार्षीत् । स तेनैव कुशलेन दशकल्पकोटीन् जातु दुर्गतिविनिपातगमनतः विंशतिश्च बुद्धकोट्यः आरागयामास । सर्व्वेषां च तेषां तथागतानामन्तिकादिमां समाधिमश्रौषीत् श्रुत्वापि तेभ्यो बुद्धेभ्यस्तेनोद्गृहीतः पर्य्यवाप्तः धारितो वाचितः भावनायोगमनुयुक्तोव्यहार्षीत् । स ततः पश्चात्तेनैव कुशलमूलेन दशानां कल्पकोटीनां अत्ययेन परिपूर्णेन कल्पशतसहस्रेण अनुत्तरां सम्यक्सम्बोधिमभिसम्बुद्धोऽभूत् । ज्ञानशूरो नाम तथागतोऽर्हन् सम्यक्सम्बुद्धोऽभूत् । सोऽप्रमेयानां सत्वानामर्थं कृत्वा पश्चाद्बुद्धत्वपरिनिर्व्वाणेन परिनिर्वृतोऽभूत् । तत्र कुमार यानि तान्यशीति प्राणिशतसहस्राणि राज्ञा महाबलेन सार्द्धम्भगवन्तं घोषदत्तं तथागतमुपसंक्रान्तानि । तेऽपि सर्व्वे इमां समाधिं श्रुत्वा तुष्टा उदग्रा आत्तमनस्काः प्रमुदिताः प्रीतिसौमनस्यजाताः केशश्मश्रूण्यवतार्य्य काषायाणि वस्त्राणि परिधाय सम्यगेव श्रद्धया आगारादनागारिकां प्रव्रजिताअभूवन् । तेऽपि तथा प्रव्रजिता इमां समाधिं उद्गृह्य पर्य्यवाप्य धारयित्वा वाचयित्वा भावनायोगमनुयुज्य विहृत्य अनेनैव कुशलमूलेन विंशतिः कल्पकोट्यो न जातु दुर्गतिविनिपातमगमन् सर्व्वत्र च कल्पेकल्पे बुद्धकोटिमबुद्धकोटिमारागयामासुः । सर्व्वेषां च तेषां तथागतानामन्तिके इमं समाधिं श्रुत्वा उद्गृह्य पर्य्यवाप्य धारयित्वा वाचयित्वा भावनायोगमनुयुज्य विहृत्य तेनैव पूर्व्वकेन कुशलमूलेन विंशतीनां कल्पकोटीनामत्ययेन ततः पश्चात्परिपूर्णैर्दशभिः कल्पसहस्रैः अनुत्तरां सम्यक्सम्बोधिमभिसम्बुद्धानां परिपाच्य तेषामर्थं कृत्वा ततः पश्चाद्बुद्धपरिनिर्व्वाणेन परिनिर्वृता अभूवन् । तदनेनापि ते कुमार पर्य्यायेणैवं वेदितव्यं । यथायं समाधिर्बहुकरो बोधिसत्त्वानां महासत्त्वानामनुत्तरस्य सर्व्वज्ञज्ञानस्याहरणाय सम्वर्त्तत इति । अथ खलु भगवांश्चन्द्रप्रभस्य कुमारभूतस्य तस्यां वेलायामेव पूर्व्वयोगपरिवर्त्तं भूयस्या मात्रया गाथाभिर्गीतेन विस्तरेण संप्रकाशयति स्म ।

स्मराम्यहं पूर्वमतीतमध्वनी अचिन्तिये कल्पि नराणमुत्तमः ।
उत्पन्न लोकार्थकरो महर्षी नामेन सो उच्यति घोषदत्तः ॥
अशीतिकोट्यः परिपूर्ण तस्य प्रथमो गणो आसिय श्रावकाणां ।
द्वितीय चासी परिपूर्ण सप्ततिस्तृतीय चो षष्ट्यर्हन्त कोटियः ॥
सर्व्वे च क्षीणास्रव निष्क्लेशाः सर्व्वे च ऋद्धीबलपारमिङ्गताः ।
वर्षः सहस्राद्दुविविनसचायः क्षेत्रं आसीत् परिशुद्ध सोभनं ॥
अभिषेकप्राप्ता परहित अप्रमेयाः वसिते भूमीहि च सुप्रतिष्ठिताः ।
आसन्निते द्रुमवरि बोधि बुध्दितुं ये बोधिसत्त्वास्त अभूषितायिनः ॥
इह जम्बूद्वीपस्मि अभूषि राजा दृढबलो नाम महाबलस्त्र ।





उपार्धु राजस्य तदेकु भुञ्जतो द्वितीय चार्धस्य अभूषि राजा ॥
महाबलस्य विजिनस्मि बुद्धो उत्पन्नु सो देवमनुष्यपूजितः ।
लभित्व राजा सुगतस्मि श्रद्धां उपस्थिही वर्षसहस्र पूर्णं ॥
तस्यानुशिक्षी बहु अन्यि सत्वाः कुर्व्वन्ति सत्कार तथागतस्य ।
लोकाभिषेणो न हि धर्म्मपूजया स श्रावकस्या अतुला तु उत्सदा ॥
अभूषि चित्तं द्विपदोत्तमस्य देशिष्यि धर्म्म इमि धर्म्मकामा ।
यन्नून सर्व्वं प्रजहित्व कामानभिप्रव्रजेयुर्मनसा स तस्मिन् ॥
स भाषते गाथवराणमुत्तमं संलेखधर्म्मा सुगता न शिक्षं ।
गृहावासतो गतो नृपः न सङ्गु रोहस्मि स्थिहित्व सर्व्वा ॥
प्रतिपद्यितुं उत्तम धर्म्मपूजाः स राज्य त्यक्त्वा यथ खेटपिण्डं ।
प्राणिसहस्रेभि अशीतिभिः सह उपसंक्रमी तस्य जिनस्य अन्तिकं ॥
वन्दित्व पादौ पुरतः स्थितोऽभूत् तेषां जिनो आस युजानमानो ।
देशन्ति मं शान्तसमाधिदुर्दृशं ते प्रीतिप्रामोद्यसुखेन प्रीतौ ॥
तुष्टा उदग्रास्तदा प्रव्रजिंसु ते प्रव्रजित्वा न इमां समाधिं ।
धारित्व वाचित्व पर्य्यापुणित्वा न जातु गच्छी विनिपातदुर्गति ॥
कल्पाण कोट्यः परिपूर्णविंशतिं ते तेन सर्व्वे कुशलेन कर्म्मणा ।
अद्राक्षु बुद्धान सहस्रकोटियः सर्व्वेष चो तेष जिनान शासने ॥
ते प्रव्रजित्वेषु समाधि भावयी ते पश्चिमे कालि अभूषि बुद्धा ।
दृढशूरनामेन अनन्तवीर्य्येण कृत्वा च अर्थम्बहूप्राणकोटिनां ॥
ते पश्चि कालस्मि शिखीव निर्वृताः महाबलो राज य आसि पूर्व्वं ।
अज्ञानशूरो अभू बुद्धलोके तदा बहुप्राणसहस्रकोटियः ॥
स्थपेत्व बोधाय स पश्चि निर्वृतः तस्माच्छ्रुणित्वा इमु यश्च काले ।
धारेस्य सूत्र इमु बुद्धवर्णिनां धारित्विमं इद्वृश धर्म्मराजं ॥
भविष्यथा क्षिप्र नराणमुत्तमा इति ॥

घोषदत्तपरिवर्त्तो नाम पञ्चमः ॥

---

## षष्ठपरिवर्त्तः ।

तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म । तस्मात्तर्हि कुमार बोधिसत्त्वेन महासत्त्वेन इमं समाधिं काङ्क्षता क्षिप्रञ्चानुत्तरां सम्यक्सम्बोधिमभिसम्बोद्धुकामेन समाधिपरिकर्म्म करणीयं । तत्र कुमार कतमत् समाधिपरिकर्म्म । इह कुमार बोधिसत्त्वो महासत्त्वः महाकरुणासंप्रस्थितेन तिष्ठता वा तथागतानां परिनिर्वृतानां वा पूज्यकर्म्मणे उद्युक्तो

भवति । यदुत चीवरपिण्डपात्रशयनासनग्लानप्रत्ययभैषज्यपरिष्कारैः पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरछत्रध्वजघण्टापताकाभिस्तूर्य्यताडावचनैः वैजयन्तीभिः तच्च कुशलमूलं समाधिप्रतिलम्भाय परिणामयति । स न कश्चिद्धर्म्ममाकाङ्क्षति तथागतपूजयेति । न कामान्न भोगान् न स्वर्गं न परिवारं । अपि तु खलु पुनर्धर्म्मचित्तको भवति । स आकाङ्क्षन् धर्म्मकायतोऽपि तथागतं नोपलभते किमस्य पुनरूपकायत उपलप्स्यते । तस्मात्तर्हि कुमार एषा सा तथागतानां पूजा यदुत तथागतस्यादर्शनमात्मनश्चानुपलब्धिः कर्म्मविपाकस्य चाप्रतिकाङ्क्षणता अनया कुमार त्रिमण्डलपरिशुद्धया पूजया तथागतं पूजयित्वा बोधिसत्त्वो महासत्त्व इमं समाधिं प्रतिलभते क्षिप्रञ्चानुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते ।

अथ खलु भगवांस्तस्यांवेलायां चन्द्रप्रभस्य कुमारभूतस्य एवमेव समाधिपरिकर्म्मनिर्द्देशं भूयस्या मात्रया गाथाभिर्गीतेन विस्तरेण संप्रकाशयति स्म ।

अनन्तज्ञानस्य ददित्व गन्धा ननन्तु गन्धो भवती नराणां ।
न कल्पकोटीय व्रजन्ति दुर्गतिं दुर्गन्धियन्तेषु न जातु भोति ॥
ते कल्पकोट्याश्चरमाणुचारिकां पूजेत्व बुद्धान सहस्रकोटियः ।
ते ज्ञानगन्धेन समुद्गतेन भवन्ति बुद्धावरशीलगन्धिकाः ॥
स चेत् पुनः जानति नास्ति सत्वो यो गन्धदेवी तथ यस्य दीयते ।
एतेन चित्तेन ददाति गन्धानेष्यस्य क्षान्तिर्मृदुकानुलोमिकी ॥
तस्यैव क्षान्ती अधिमात्रु सेवतः स चेन्नरः कारुणिकश्च-च्छेद्युते ।
कल्पान कोट्यो यथ गङ्गवालिका न तस्य चित्तं भवती विवर्त्तिय ॥
किङ्कारणं वुच्चति क्षान्ति नाम कथं पुनो वुच्चति आनुलोमिकी ।
अविवर्त्तियो वुच्चति केन हेतुना कथं पुनो वुच्चति बोधिसत्त्वः ॥
क्षान्त्यस्मि धर्म्मे प्रकृती निरात्मके नैरात्म्यसंज्ञिस्य किलेशु नास्ति ।
यो यादृशं जानति सर्व्वधर्म्मं तस्मादिहास्याकृतु क्षान्ति नाम ॥
अनुलोम सर्व्वेष जिना न शिक्षते न चास्य धर्म्मेश्चरते विचक्षणाः ।
न बुद्धधर्म्मेषु जिनेति संशयानियं स क्षान्तिर्भवतानुलोमिकी ॥
एवञ्चरन्तस्य य लोकि मारास्ते बुद्धरूपेण भणेष्य वाचा ।
सुदुर्लभा बोधिभवाहि श्रावको न गृह्णती वाक्तुरवो विवर्त्तत ॥
बोधेति सत्त्वान् विषमातु दृष्टितो न एष मार्गो अमृतस्य प्राप्तये ।
कुमार्गं वर्जित्व पथे स्थपेति तं कारणं उच्यति बोधिसत्त्वः ॥
क्षमिष्य नूलोमपथे स्थितस्य नैरात्म्य संज्ञायति बोधि तस्य ।
स्वप्नान्तरेऽप्यस्य न जातु भोति अस्ती नरो पुद्गलजीवसत्त्वो ॥
स विमानकोट्यो यथ गङ्ग वालिकास्ते बुद्धरूपेण उपागमित्वा ।
भणेयुरत्यन्तरिकाय जीवो तेषाञ्च दे नास्ति न यूय वुः ॥ (?)
ज्ञानेन जान्यहूस्कन्धशून्यकां ज्ञात्वा च क्लेशेहि न संवसामि ।





आहारमात्रेण च व्याहरामि परिनिर्वृतो लोकमिमं चरामि ॥
यथापि पुत्रः पुरुषस्य जातो कृतंसि नामं अयमेव नामा ।
नामन्न तस्योद्दि सतानुपलभ्यते तथास्य नामन्न कुतश्चिदागतं ॥
तथैव नामं कृतु बोधिसत्त्वो न चास्य नामं हि सतानुलभ्यसे ।
पर्य्येषमाणो अयु बोधिसत्त्वो जानाति यो एष सुबोधिसत्त्वः ॥
समुद्रमध्येऽपि ज्वलेत अग्निर्न बोधिसत्त्वस्य स कायदृष्टिः ।
यतोऽस्य बोधाय उत्पन्नचित्तमन्त्रान्तरे तस्य न जीवदृष्टिः ॥
न ह्यत्र जातो न मृतो व कश्चिदुत्पन्नु सत्त्वो मनुजो नरो वा ।
मायोपमा, धर्म्मस्वभावशून्या न शक्नुते जानितु तीर्थिकेभिः ॥
न चापि आहारविमूर्च्छितेहि लब्धेहि गृध्येहि च पात्रचीवरे ।
न चोद्धतेही नपि चोन्नतेहि शक्यो इयं जानितु बुद्धबोधिः ॥
नस्त्यानमिद्धाभिशतेः कुशीदेस्तथ्रीहिमानीहि अनोत्रयेहि ।
येषान्न बुद्धस्मि प्रसाद अस्ति न शक्नु तेहि वरबोधि बुद्धितुं ॥
न भिन्नवृत्तेहि पृथग्जनेहि येषान्न धर्म्मस्मि प्रसादु अस्ति ।
स ब्रह्मचारीषु न नास्ति गौरवं न शक्नु तेहीइय बोधि बुद्धितुं ॥
अभिन्नवृत्ताहि रिमन्तलर्जिनो येषास्ति बुद्धा अपि धर्म्मे प्रेम ।
स ब्रह्मचारीषु च तीव्रगौरवं ते प्रापणन्ती वरबोधिमुत्तमां ॥
स्मृतेरुपस्थानिहि येषु गौरवं प्रमोद्यप्रीती शयनं उपस्कृतं ।
ध्यानानि चाहारु समाधियानियं बुध्यन्ति ते चीवरबोधिमुत्तमां ॥
नैरात्म्यसंज्ञाश्च दिवा विहारा अनुस्मृतिश्च क्रमशून्यभावनं ।
बोध्यङ्गपुष्पा सुरभी मनोरमा ते पूज्यमाना वरबोधिप्रापणी ॥
या बोधिसत्त्वानुचरी विभूनामभूमिरन्यस्य जनस्य तत्र ।
प्रत्येकबुद्धान श्रावकाण चो कोवात्र विज्ञान जनेय छन्दं ॥
स चेत् मया आयु यत्तकं कल्पान कोट्यो यथ गङ्गवालिका ।
एकस्य रोमस्य भणेय्य वर्णं बौद्धेन ज्ञानेन पर्य्यन्त नास्ति ॥
तस्माच्छृणित्वा इम आनुसंसां अनाभिभूतेन जिनेन देशितां ।
इमं समाधिं लघु दद्दि शेषा न दुर्लभा भेष्यति अग्रबोधिः ॥

समाधिपरिवर्त्तो नाम षष्ठमः ॥

# सप्तमपरिवर्त्तः ।

तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म । तस्मात्तर्हि कुमार बोधिसत्त्वेन महासत्त्वेन इमं समाधिमाकाङ्क्षता क्षिप्रञ्चानुत्तरां सम्यक्सम्बोधिमभिसम्बोद्धुकामेन त्रिक्षान्तिज्ञानकुशलमूलेन भवितव्यं तेन प्रथमा क्षान्तिः प्रज्ञातव्या । द्वितीया क्षान्तिः प्रज्ञातव्या । तृतीया क्षान्तिः प्रज्ञातव्या । त्रिक्षान्तिविशेषकुशलेन भवितव्यं । त्रिःक्षान्तिज्ञानविशेषकुशलेन च भवितव्यं । तत् कस्य हेतोस्तथा हि कुमार यदा बोधिसत्त्वो महासत्त्वः त्रिक्षान्तिविशेषकुशलो भवति त्रिक्षान्तिज्ञानविशेषकुशलश्च भवति । तदायं कुमार बोधिसत्त्वो महासत्त्वः क्षिप्रमिमं समाधिं प्रतिलभते क्षिप्रञ्चानुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । तस्मात्तर्हि कुमार बोधिसत्त्वेन महासत्त्वेनानुत्तरां सम्यक्सम्बोधिमभिसम्बोद्धुकामेनायन्त्रिक्षान्त्यवतारो धर्म्मपर्य्यायः उद्ग्रहीतव्यः उद्गृह्य च परेभ्यः विस्तरेण संप्रकाशयितव्यः । तद्भविष्यति बहुजनहिताय बहुजनसुखाय । लोकानुकम्पायै महतो जनकायस्यार्थाय हिताय सुखाय देवानाञ्च मनुष्याणाञ्च इति । अथ खलु भगवान् चन्द्रप्रभस्य कुमारभूतस्य इमं त्रिक्षान्त्यवतारं धर्म्मपर्य्यायं गाथाभिर्गीतेन सम्प्रकाशयति स्म ।

न केनचित् सार्द्धं करोति विग्रहन्न भाषते वाचमनर्थसंहितं ।
अर्थे च धर्म्मेञ्च सदा प्रतिष्ठितः प्रथमाय क्षान्तीय सुनिर्द्दिशीयति ॥
मायोपमां जानथ सर्व्वधर्म्मान् न चापि सो भोति निमित्तगोचरः ।
न हीयते ज्ञानि विशुद्धि भूमेः प्रथमाय क्षान्तीय इमे विशेषाः ॥
स सर्व्वसूत्रान्तनयेषु कोविदः सुभाषि तस्मिन्नधिमुक्तु पण्डितः ।
अनन्तज्ञानी सुगतान ज्ञान प्रथमाय क्षान्तीय इमे विशेषाः ॥
यं किञ्चि धर्म्मं शृणुते सुभाषितं बुद्धा नचो भाषितु तन्न काङ्क्षति ।
अधिमुच्यते सर्व्वजिनान धर्म्मतां प्रथमाय क्षान्तीय इम विशेषजानती ॥(?)
यथोपदिष्टा सुगतेन शून्यतां यस्मिन् पुनः पुद्गल सत्त्वपूरुषो ।
न यार्थतां जानति सर्व्वधर्म्मां ये अस्मि लोके पृथु अन्यतीर्थाः ॥
न तस्य तेष्वप्रतिहन्यते मनः कारुण्यमेतेषु उपस्थयेति ।
प्रथमाय क्षान्तीय इति विशेषाः आभासमागच्छति तस्य धारणी ॥
तस्मिंश्च आभाषि न जातु काङ्क्षति सभ्यो न परिवर्त्तिनि वाच भषते ।
प्रथमाय क्षान्तीय इमे विशेषाः चतुर्ण्णु धातूनपि यान्यथात्वं ॥
वायुं च तेजो पृथिवीय चोऽपि न चाविवर्त्तेति स बुद्धबोधेः ।
प्रथमाय क्षान्तीय इमे विशेषाः य शिल्पस्थाना पृथु अस्मि लोके ॥
सर्व्वेष सो शिक्षितु बोधिसत्त्वः न चात्मनो उत्तरि किञ्चि पश्यति ।
प्रथमाय क्षान्तीय इमे विशेषाः अकम्पिय समयबलेन भोति ॥
शैलोपमो भवति वि यस्य नाय नभोभितुं स सर्व्वसत्त्वैः ।





द्वितीयाय क्षान्तीय निर्द्दिशीयति समाहितं तिष्ठति भाषते च ॥
समाहितश्च क्रमते निषीदति समाधिये पारमिताङ्गतो विदुः ।
द्वितीयाय क्षान्तीय इमे विशेषाः समाधितो लभति अभिज्ञयश्च ॥
क्षेत्रेशतां गच्छति धर्म्मदेशको रोचायि सो ऋद्धिबलात्तु हीयते ।
द्वितीयाय क्षान्तीय इमे विशेषाः स तादृशं शान्त समाधि सेवते ॥
समाहितस्य न स अस्ति सत्त्व यस्तस्य चित्तस्य प्रमाणु गृह्णियात् ।
द्वितीयाय क्षान्तीय इमे विशेषा ये लोकधातुष्विह केचि सत्त्वाः ॥
ते बुद्धज्ञानेन भणेय्य धर्म्मान् उद्गृह्णती सर्व्वं यतो हि भाषितं ।
द्वितीयाय क्षान्तीय इमे विशेषा पुरिणोत्तरा दक्षिण पश्चिमासु ॥
हेष्टे तथोर्द्धम्विदिशासु चैव सर्व्वत्र सो प्रापति लोकनाथान् ।
तृतीयाय क्षान्तीय स निर्द्दिशीयति सुवर्णवर्णेन समुच्छ्रयेण ॥
अचिन्तियान्निर्म्मित निर्म्मिणित्वा देशेति धर्म्मं बहुप्राणकोटिनां ।
तृतीयाय क्षान्तीय इमे विशेषा ये जम्बुद्वीपा इह बुद्धक्षेत्रे ॥
सर्व्वत्र सो पश्यति बोधिसत्त्वः ज्ञातश्च भोती ससुरासुरे जगे ।
तृतीयाय क्षान्तीय इमे विशेषाः बुद्धानु आचारु तथैव गोचरा ॥
ईर्य्यापथो यादृश नायकानां सर्व्वत्र सा शिक्षितु बोधिसत्त्वः ।
ज्ञातश्च भोती ससुरासुरे जगे तृतीयाय क्षान्तीय इमे विशेषाः ॥
ये लोकधातुष्विह केचि सत्त्वास्ते बोधिसत्त्वस्य भणेयु वर्णं ।
स चास्य तस्मिन्ननुनीयते स नो न शिक्षितो उच्यति बुद्धज्ञाने ॥
ये लोकधातुष्विह केचि सत्त्वाः ते बोधिसत्त्वस्य भणेयु वर्णं ।
स चास्य तत्र प्रतिहन्यते मनो न शिक्षितोऽस्यापि स बुद्धज्ञाने ॥
अर्थेन लब्धेन न भोति सुमना न चाप्यनर्थेन स भोति दुर्म्मनाः ।
शैलोपमे चित्त सदा प्रतिष्ठितो अयं विशेषस्तृतीयाय क्षान्तिये ॥
घोषानुगामी इय क्षान्ति उक्ता चिन्तामयी भावन आनुलोमिकी ।
श्रुतंमयी सा अनुपत्तिका या शिक्षाश्च अत्राप्ययु बोधिमार्गे ॥
तिस्रोऽपि क्षान्तीय यदा निरुत्तराः स बोधिसत्त्वेन भवन्ति लब्धाः ।
दृष्ट्वा ततस्तं सुगता नरोत्तमाः पियाकरोती विरजाय बोधये ॥
ततोऽस्य तं व्याकरण श्रुणित्वा प्रकम्पिता मेदिनि षड्विकारं ।
आभाय क्षेत्रम्भवते प्रभास्वरं पुष्पाणि चो वर्षिषु देवकोट्यः ॥
तस्यो च तं व्याकरणं शुणित्वा सत्त्वान कोटी नियुता अचित्ता ।
उत्पादयी चित्तु वराग्रबोधये वयम्पि भेष्याम जिनार्य्यचेतिया ॥
क्षान्त्या इमास्तिस्र निरुत्तरा यदा सम्बोधिसत्त्वेन भवन्ति लब्धाः ।
न चापि सो जायति नापि म्रियते न चापि सो धूयति न चोपपद्यते ॥

यदा इमां क्षान्तिमयीं निरुत्तरां स बोधिसत्त्वेन भवन्ति लब्धा ।
न पश्यते जायति यश्च म्रियते च्यवते धर्म्मताम्पश्यति सर्व्वधर्म्मान् ॥
तथाहि तेनो वितथेति ज्ञाता मायोपमा धर्म्मस्वभावशून्याः ।
न शून्यताम्पश्यति नोच म्रियते स्वभावशून्या इति सर्व्वधर्म्मान् ॥
यदाप्यसौ संस्कृत भोति केनचित् उपस्थितो मानितु पूजितोऽपि वा ।
न तस्य तस्मिन्नतु प्रीयते मनो जानाति सो धर्म्मस्वभावशून्यतां ॥
आक्रुष्टसत्त्वेहि प्रहारगर्जितो न तेषु क्रोधं कुरुते न मानं ।
मैत्रीं च तेषु दृढसंजनेत्री ते सैव सत्त्वान प्रमोचनाय ॥
लोष्टेहि दण्डेहि च ताड्यमानः प्रतिघातु तेषु न करोति पण्डितः ।
नैरात्म्यक्षान्तीय प्रतिष्ठितस्य न विद्यते क्रोधखिलं न मानः ॥
तथाच तेनो वितथेति ज्ञाता मायोपमा धर्म्मस्वभावशून्याः ।
स तादृशे धर्म्मनये प्रतिष्ठितः सुसत्कृतो भवति स देवलोके ॥
यदापि सत्त्वाः प्रगृहीतशस्त्राः छिन्देयु तस्या पृथु अङ्गमध्यं ।
न तस्य तेषु प्रतिहन्यते मनो नो वापि मैत्र्या करुणा तु हीयते ॥
एवञ्च सो तत्र जनेति चित्तं छिद्यन्ति तेही पृथु अङ्गमङ्गे ।
माता च मह्यं सिय शान्त निर्वृती यावन्न स्थोयथिमि अग्रबोधये ॥
एतादृशो क्षान्तिबले निरुत्तरे नैरात्म्यक्षान्ती समता विहारिणां ।
स बोधिसत्त्वान महायशानां कल्याणकोट्यः शततं सुभाषिता ॥
ततोत्तरे यान्ति कगङ्गवालिका न ताव बोधी भवतीह स्पर्शिता ।
ये बुद्धज्ञानेन करोति कार्य्यं किं वा पुन ज्ञान तथागतानाम् ॥
क्षयेतु वर्णः सुकरन्न तेषां प्रभाषता कल्पशतान्यचिन्तियाम् ।
अनन्तकीर्त्ति न महायशानां नैरात्म्यक्षान्तीय प्रतिष्ठितानां ॥
तस्माद्धिया इच्छति बोधि बुध्यतुं ता ज्ञानस्कन्ध प्रवरन्निरुत्तरां ।
स क्षान्तिभात्रे तु जिनेन वर्णितां न दुर्लभा बोधिवरा भविष्यति ॥

क्षान्त्यावतारपरिवर्त्तो नाम सप्तमः ॥

---

# अष्टमपरिवर्त्तः ।

तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म । तस्मात्तर्हि कुमार बोधिसत्त्वेन महासत्त्वेन इमं समाधिमाकाङ्क्षता क्षिप्रं समाधिमाकाङ्क्षता क्षिप्रञ्चानुत्तरां सम्यक्सम्बोधिमभिसम्बोद्धुकामेन सर्व्वधर्म्माणामभावस्वभावज्ञानकुशलेन भवितव्यं । कथञ्च कुमार बोधिसत्त्वो महासत्त्वः सर्व्वधर्म्माणामेव भावस्वभावज्ञानकुशलो भवति । इह कुमार





बोधिसत्त्वेन महासत्त्वेन अभावा अस्वभावाः अनिमित्ता अलक्षणा अनुत्पन्नाः अनिरुद्धाः अनक्षराः शून्या आदिशान्ताः प्रकृतिविशुद्धाः सर्व्वधर्म्माः प्रज्ञातव्याः । यदा च कुमार बोधिसत्त्वेन महासत्त्वेन अभावस्वभावा अनिमित्ता अलक्षणा अनुत्पन्ना अनिरुद्धा अनक्षराः शून्या आदिशान्ताः प्रकृतिविशुद्धाः सर्व्वधर्म्माः प्रतिज्ञाता भवन्ति । यथाभूततः तदायं कुमार बोधिसत्त्वो महासत्वः सर्व्वधर्म्माणामभावस्वभावज्ञानकुशल इत्युच्यते । सर्व्वधर्म्माणामभावस्वभावज्ञानकुशलो हि कुमार बोधिसत्त्वो महासत्त्वः सर्व्वरूपशब्दगन्धरसस्प्रष्टव्यधर्म्मेभ्यो नरकृतेभ्यो न उच्यते न मुच्यते । तत्कस्यहेतोः । तथाहि स तत् धर्म्मन्न समनुपश्यति तद्धर्म्मन्नोपलभते । यो रज्येत यत्र वा रज्येत येन वा रज्येत । यो दुष्यते । यत्र वा दुष्यते । यत्र वा मुह्यते । येन वा मुह्यते । स तद्धर्म्मन्न स मनुपश्यति । तद्धर्म्मन्नोपलभते । तं धर्म्मन्न समनुपश्यन्ननुपलभमानः । सर्व्वत्रैधातुकेनाध्यवसितो भवति ।। क्षिप्रमिमं समाधिं प्रतिलभते । क्षिप्रञ्चानुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । तत्रेदमुच्यते ।

अभावाः सर्व्वधर्म्माः अनिमित्ताः अलक्षणाः ।
अनुत्पन्ना निरुद्धाश्च एवं धर्म्मान् विजानथ ॥
अभावानक्षराः सर्व्वे शून्याः शान्तादिनिर्म्मलाः ।
य एवं जानाति धर्म्मान् कुमार बुद्धः स उच्यते ॥

धर्म्माद्धि यो इच्छि विप्रचितामिमां स्वभावसमतां सुगतान मानी ।
स्वभाव यातु सर्व्वि अभावधर्म्मा प्रतिलप्स्यतीमा जननी जिनानां ॥

तदनेनापि च कुमार पर्य्यायेणैवं वेदितव्यं । भूतपूर्व्वं कुमारातीताध्वन्यसंख्येयैः कल्पैः असंख्येयतरैः । अप्रमेये अचिन्त्ये अपरिमाणे । यदासीत्तेन कालेन तेन समयेन अभावसमुद्गतो नाम तथागतोऽर्हन् सम्यक्सम्बुद्धो लोक उत्पादि विद्याचरणसम्पन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानाञ्च मनुष्याणाञ्च बुद्धो भगवान् । तत् किं मन्यसे कुमार केन कारणेन स तथागतः अभावसमुद्गत इत्युच्यते । स खलु पुनः कुमार तथागतो जातमात्र एवोपर्य्यन्तरीक्षे सप्ततालमात्रमभ्युद्गम्य सप्तपदानि प्रक्रमित्वा इमामेवंरूपां वाचमभाषत । अभावसमुद्गताः सर्व्वधर्म्माः अभावसमुद्गताः सर्व्वधर्म्मा इति । ते च कुमार सर्व्वे न त्रिसाहस्रमहासाहस्रलोकधातुः स्वरेणाभिविज्ञप्तोऽभूत् तत्र भौमान् देवाननुपादाय यावद्ब्रह्मलोकपरम्परया शब्दमुदानयामासुः । न घोषमनुश्रावयामासुः । अभावसमुद्गतो बतायं तथागतो भविष्यति । यो जातमात्र एवोपर्य्यन्तरीक्षे सप्ततालमात्रमभ्युद्गम्य सप्तपदानि प्रक्रमित्वा अभावशब्दमुदीरयति इति ह्यभावसमुद्गतोऽभावसमुद्गत इति तस्य तथागतस्य नामधेयमुदपादि । तस्य च भगवतो बोधिप्राप्तस्य सर्व्ववृक्षपत्रेभ्यः सर्व्वतृणगुल्मौषधिवनस्पतिभ्यः सर्व्वशैलशिखरेभ्यश्च अभावसमुद्गतशब्दो निःसरति । यावती च तत्र लोकधातौ शब्दप्रज्ञप्तिः सर्व्वतः अभावसमुद्गतविज्ञप्तिः सर्व्वतः अभावसमुद्गतविज्ञप्तिशब्दो निःसरति । तेन च कुमार तेन कालेन तेन समयेन तस्य भगवतोऽभावसमुद्गतस्य तथागतस्यार्हतः सम्यक्सम्बुद्धस्य प्रवचने महाकरुणाचिन्ती नाम राजकुमारो भूतः । अभिरूपः प्रासादिको दर्शनीयः ॥

अथ खलु कुमार महाकरुणाचिन्ती राजकुमारो येन भगवानभावसमुद्गततथागतो नामार्हन् सम्यक्सम्बुद्धस्तेनोपसंक्रम्य तस्य भगवतः पादौ शिरसाभिवन्द्य तं भगवन्तं त्रिःप्रदक्षिणीकृत्य एकान्तेऽस्थात् । अथ खलु कुमार स भगवानभावसमुद्गतस्तथागतोऽर्हन् सम्यक्सम्बुद्धो महाकरुणाचिन्तिनो राजकुमारस्याध्याशयं विदित्वा इमं समाधिं देशयामास । स इमं समाधिं श्रुत्वा प्रसीदति प्रसन्नचित्तश्च केशश्मश्रूण्यवताय्य काषायाणि वस्त्राणि परिधाय सम्यगेव श्रद्धया अगारादनगारिकां प्रव्रजितः सन्निमां समाधिमुद्गृहीतं वा उद्गृह्य पर्य्यवाप्य धारयित्वा वाचयित्वा भावनायोगमनुयुज्य व्याहार्षीत् । स तेनैव कुशलमूलेन विंशतिः कल्पकोट्यो न जातु दुर्गतिविनिपातमगमत् । विंशतिश्च बुद्धकोटीः स रागयामास सर्व्वेषाञ्च तेषां तथागतानामन्तिकादिमं समाधिमश्रौषीत् श्रुत्वा च तेभ्यो बुद्धेभ्यो भगवद्भ्यस्तेनोद्गृहीतः पर्य्यवाप्तो धारितो वाचितः प्रवर्त्तितः अरणाभावनया भावितो बहुलीकृतो भावनायोगमनुयुक्तश्च व्याहार्षीत् । स तेनैव पूर्व्वकेण कुशलमूलेन विंशतीनां कल्पकोटीनामत्ययनानुत्तरां सम्यक्सम्बोधिमभिसम्बुद्धोऽभूत् । सुविचिन्तितार्थो नाम तथागतोऽर्हन् सम्यक्सम्बुद्धो लोक उत्पादि विद्याचरणसम्पन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानाञ्च मनुष्याणाञ्च बुद्धो भगवान् अप्रमेयासंख्येयान् सत्वान् परिपाच्य अपरिमाणानाञ्च सत्वानामर्थं कृत्वा ततः यथा ज्योतिरिन्धनक्षयात् परिनिर्वृतोऽभूत्तदनेनापि ते कुमार पर्य्यायेणैवं वेदितव्यं । यथायं समाधिर्बहुतरो बोधिसत्वानां महासत्वानामनुत्तरस्य बुद्धज्ञानस्य परिपूरणाय स वर्त्तते । अथ खलु भगवांस्तस्यां वेलायां भूयस्या मात्रया तमेव योगपरिवर्त्तञ्चन्द्रप्रभस्य कुमारभूतस्य विस्तरेण गाथाभिर्गीतेन सम्प्रकाशयति स्म ।

स्मराम्यहं पूर्व्वमतीतमध्वनि अचिन्तिये कल्पि नराणमुत्तमः ।
उत्पन्नु लोकोपकरो महर्षी नाम्नाह्यसौ ऽभावसमुद्गतोऽभूत् ॥
स जातमात्रो गगणे स्थिहित्वा सर्व्वाणि धर्म्माणि अभावणायी ।
तदानुरूपं कृतु नामधेयं शब्देन सर्व्वन्निसहस्र विज्ञपी ॥
देवापि सर्व्वे स मुमोच शब्दं अभावनाम्नेति जिनो भविष्यति ।
यो जातमात्रो पदसप्तप्रक्रममभावधर्म्माणि ब्रवीति नायकः ॥
बुद्धो यदा भेष्यति धर्म्मराजः सर्व्वाणि धर्म्माणि प्रकाशको मुनिः ।
तृणवृक्षगुल्मौषधिशैलपर्व्वत अभावधर्म्माणि नचो भविष्यति ॥
यावन्ति शब्दास्तहि लोकधातौ सर्व्वेह्यभावा न हि कश्चि भावता ।
यावत्त ख्यातस्य तथागतस्य स्वरुणिश्वरी लोकविनायकस्य ॥
तस्मिंश्च काले अभु राजपुत्रो करुणाय चिन्ती सदनामधेयो ।
अभिरूपप्रासादिक दर्शनीयो उपागमि तस्य जिनस्य अन्तिकम् ॥
वन्दित्व पादौ मुनिपुङ्गलस्य प्रदक्षिणीकृत्य च गौरवेण ।
प्रसन्नचित्तो निषसाद तत्र श्रवणाय धर्म्मं विरजं अनुत्तरं ॥





सो च जिनो आसन्नु ज्ञात्व धीरो प्रकाशयामास समाधिमेतं ।
श्रुत्वा च सो इमु विरजं समाधिं लघुप्रव्रजी जिनवरशासनेऽस्मिन् ॥
स प्रव्रजित्वा न इमं समाधिं धारित्व वाचित्व पर्य्यापुनित्वा ।
कल्याणकोट्यः परिपूर्ण विंशति न जातु गच्छी विनिपातभूमिं ॥
स तेन चैव कुशलेन कर्म्मणा आगारयी विंशति बुद्धकोट्यः ।
तेषाञ्च सर्व्वेषां जिनान अन्तिके इमं वरं शान्तसमाधि भावयी ॥
स पश्चि काले अभु बुद्धलोकि सुविचिन्तितार्थो सदनामधेयो ।
कृत्वा च अर्थं बहुप्राणिकोटिनां स पश्चि कालस्मि शिखीव निर्वृतः ॥

अभावसमुद्गतपरिवर्त्तो नामाष्टमः ॥

---

## नवमपरिवर्त्तः ।

तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म । तस्मात्तर्हि कुमार य इच्छेद्बोधिसत्वो महासत्वो न किमित्यहं क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुद्धो भवेयमिति । सर्व्वसत्वांश्चोत्तारयेयं भवार्णवादिति तेन कुमार बोधिसत्वेन महासत्वेन अयं सर्व्वबुद्धसंवर्णितः सर्व्वधर्म्मस्वभावसमताविपञ्चितः समाधिराजो धारयितव्यो वाचयितव्यः । तत्कस्य हेतोः । जनको ह्ययं कुमार सर्व्वधर्म्मस्वभावसमताविपञ्चितः समाधिराजस्तथागतानामर्हतां सम्यक्सम्बुद्धानां अतो निर्य्याताः सर्व्वे तथागताः सर्व्वश्रावकाः प्रत्येकबुद्धाश्च । तस्मात्तर्हि कुमार त्वयायं सर्व्वः तथागतो वर्णितः । सर्व्वतथागतजनकः सर्व्वधर्म्मस्वभावसमताविपञ्चितः समाधिराजो धारयितव्यो वाचयितव्यः परेभ्यश्च विस्तरेण संप्रकाशयितव्य इति । तत्रेदमुच्यते ।

तस्माद्धि यो इच्छति बोधि बुध्यतुं सत्वांश्च सन्तारयितुं भवार्णवात् ।
धारेतु सूत्रं इमु बुद्धवर्णितं न दुर्लभा बोधिवरा भविष्यति ॥ इति ।

तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म । तस्मात्तर्हि कुमार बोधिसत्वेन महासत्वेन इमं समाधिमाकाङ्क्षता क्षिप्रञ्चानुत्तरां सम्यक्सम्बोधिमभिसम्बोद्धुकामेन गम्भीरधर्म्मक्षान्तिकुशलेन भवितव्यं । कथञ्च बोधिसत्वो महासत्वो गम्भीरधर्म्मक्षान्तिकुशलो भवति । इह कुमार बोधिसत्वेन महासत्वेन मायोपमाः सर्व्वधर्म्माः यथाभूततः प्रज्ञातव्याः स्वप्नोपमाः प्रतिश्रुत्कोपमाः प्रतिभासोपमाः दर्शचन्द्रोपमाः निर्म्मितोपमाः प्रतिविम्बोपमाः सर्व्वधर्म्माः प्रज्ञातव्याः । यदा च कुमार बोधिसत्वेन महासत्वेन मायोपमाः सर्व्वधर्म्मा परिज्ञाताः भवन्ति स्वप्नोपमाः मरीच्युपमाः प्रतिश्रुत्कोपमाः प्रतिभासोपमा दर्शचन्द्रोपमा निर्म्मितोपमाः प्रतिविम्बोपमाः सर्व्वधर्म्माः परिज्ञाता भवन्ति । यथाभूततस्तदायं कुमार बोधिसत्वो महासत्वः गम्भीरधर्म्मक्षान्तिकुशल इत्युच्यते । स गम्भीरतया धर्म्मक्षान्त्या समन्वागतो रञ्जनीयेषु धर्म्मेषु न रज्यते दूष्यते मोहनीयेषु धर्म्मेषु न मुह्यते । तत्कस्य-

हेतोः तथा हि स तन्धर्म्मं न समनुपश्यति । तं धर्म्मन्नोपलभते । यो रज्येत यत्र वा रज्येत येन वा रज्येत । यो दूष्यते यत्र वा दूष्यते येन वा दूष्यते । यो मुह्येत यत्र वा मुह्येत । येन वा मुह्येत स तं धर्म्मं न समनुपश्यति तं नोपलभ्यते । तं धर्म्ममसमनुपश्यन्ननुपलभमानः अरक्त अदुष्टः अमूढः अविपर्य्यस्तचित्तः समाहित इत्युच्यते । निष्प्रपञ्च इत्युत्तीर्णः पारग इत्युच्यते । स्थलगत इत्युच्यते । क्षेमप्राप्त इत्युच्यते । शीलवानित्युच्यते । ज्ञानवानित्युच्यते । प्रज्ञावानित्युच्यते । पुण्यवानित्युच्यते । ऋद्धिमानित्युच्यते । स्मृतिमानित्युच्यते । मतिमानित्युच्यते । गतिमानित्युच्यते । ह्रीमानित्युच्यते । धृतिमानित्युच्यते । चारित्रवानित्युच्यते । धूतगुणसंलेखवानित्युच्यते । अनङ्गन इत्युच्यते । निष्किञ्चन इत्युच्यते । अर्हन्नित्युच्यते । क्षीणास्रव इत्युच्यते । निःक्लेशो वशीभूतः सुविमुक्तप्रज्ञ आजानेयो महाभागः कृतकृत्यः कृतकरणीयः अपहृतभारः अनुप्राप्तस्वकार्थः परिक्षीणभवसंयोजनः सम्यगाज्ञासुविमुक्तप्रज्ञः आजानेयो महानागचित्तः सर्व्वचेतोवशी परमपारमिप्राप्तः । श्रमण इत्युच्यते । ब्राह्मण इत्युच्यते । स्नातक इत्युच्यते । पारग इत्युच्यते । वेदक इत्युच्यते । श्रोत्रिय इत्युच्यते । बुद्धपुत्र इत्युच्यते । शाक्यपुत्र इत्युच्यते । मर्द्दितकण्टक इत्युच्यते । उत्क्षिप्तपरिख इत्युच्यते । उत्कीर्णपरिख इत्युच्यते । आमृष्टशल्य इत्युच्यते । निर्ज्जर इत्युच्यते । भिक्षुरित्युच्यते अपर्य्यवदान इत्युच्यते । पुरुष इत्युच्यते । सत्पुरुष इत्युच्यते । अत्र पुरुष इत्युच्यते । महापुरुष इत्युच्यते । पुरुषसिंह इत्युच्यते । पुरुषनाग इत्युच्यते । पुरुषाजानेय इत्युच्यते । पुरुषधौरेय इत्युच्यते । पुरुषं शुष इत्युच्यते । पुरुषवीर इत्युच्यते । पुरुषपुष्प इत्युच्यते । पुरुषपद्म इत्युच्यते । पुरुषपुण्डरीक इत्युच्यते । पुरुषदमक इत्युच्यते । पुरुषचन्द्र इत्युच्यते । अकारक इत्युच्यते । अनुपलिप्त इत्युच्यते । अथ खलु भगवानिममेव गम्भीरधर्म्मक्षान्त्यवतारं धर्म्मक्षान्तिपर्य्यायमुद्भावयन्निमाः गाथा अभाषत ।

यदलोकधातुन विवर्त्ता भोती अयु सर्व्वलोको ।
यथैवतो पूर्व्वं तथैव पश्चात् तथोपमान् जानथ सर्व्वधर्म्मान् ॥
इदं जगद्यावदन्त किञ्चि वर्त्तते अध्वस्तमेती अमायस्कान्धः ।
यथैव तं ह्यष्टि तथैव ऊर्द्धं तथोपमान् जानथ सर्व्वधर्म्मान् ॥
यथान्तरीक्षस्मि न किञ्चिदभ्रं क्षणेन चोद्दृश्यति अभ्रमण्डलं ।
पूर्व्वान्तु जानथः कुतः प्रसूतं तथोपमान् जानथ सर्व्वधर्म्मान् ॥
तथागतस्योपरि निर्वृतस्य मनाकरोऽन्तः प्रतिविम्ब दृश्यते ।
यथैव तं पूर्व्वं तथैव पश्चात् तथोपमान् जानथ सर्व्वधर्म्मान् ॥
यथैव ह्येतस्य महन्तु पिण्डं श्रोघेन उत्क्षेत्तु नरो निरीक्षते ।
निरीक्ष्य सो तत्र न सारसन्दर्शी तथोपमान् जानथ सर्व्वधर्म्मान् ॥
देवो यथा वर्षति स्थूलविन्दुकं पृथक्पृथुद्बुदकं भवन्ति ।
उत्पन्न भग्ना न हि सन्ति बुद्बुदाः तथोपमान् जानथ सर्व्वधर्म्मान् ॥
यथैव ग्रामान्तलि लेखदर्शना क्रिया प्रवर्त्तेति पृथक् शुभाशुभा ।





न लेखसंक्रान्ति गिराय विद्यते तथोपमान् जानथ सर्व्वधर्म्मान् ॥
यथा नरः पानमदेन मोहितो भ्रमन्त संजानति मां वसुन्धराम् ।
नचो महीये चलितन्न कल्पितं तथोपमान् जानथ सर्व्वधर्म्मान् ॥
आदर्शपृष्ठे तथ तैलपात्रे निरीक्षते नारिमुखमलङ्कृतं ।
सो तत्र रागं जनयित्व वाला प्रधाविता काम गवेषमाणा ॥
मुखस्य संक्रान्ति यदा न विद्यते विम्बे मुखं नैव कदाचि लभ्यते ।
यथा स मूढो जनयेत रागं तथोपमान् जानथ सर्व्वधर्म्मान् ॥
यथैव गन्धर्व्वपुरं मरीचिका यथैव माया सुपिनं यथैव ।
स्वभावशून्या तु निमित्तभावना तथोपमान् जानथ सर्व्वधर्म्मान् ॥
यथैव चन्द्रस्य नभे विशुद्धे ह्रदे प्रसन्ने प्रतिविम्ब दृश्यते ।
शशिस्य संक्रान्ति जले न विद्यते तल्लक्षणान् जानाथ सर्व्वधर्म्मान् ॥
यथा नरः शैलवनान्तरे स्थिते भणेय्य गायेय्य हसेय्य रोदयी ।
प्रतिश्रुत्का श्रूयति नोच दृश्यते तथोपमान् जानथ सर्व्वधर्म्मान् ॥
गीते च वाद्येन तथैव चोदिते प्रतिश्रुत्का जायति तं प्रतीत्य ।
गिराय घोषो न कदाचि विद्यते तथोपमान् जानथ सर्व्वधर्म्मान् ॥
यथैव कामान् सुपिनान्ति सेविय प्रतिबुद्धचेतुः पुरुषो न पश्यति ।
स वालको माद्यति कामलोभी तथोपमान् जानथ सर्व्वधर्म्मान् ॥
रूपाणयथो निर्म्मिणि मायकारो हस्तीरथां नश्वरथां विचित्रां ।
न चात्र कश्चिद्रथ तत्र दृश्यते तथोपमान् जानथ सर्व्वधर्म्मान् ॥
यथा कुमारी सुपिनान्तरेऽस्मिन् स्वपुत्र जातञ्च मृतञ्च पश्यति ।
जातेऽतितुष्टा मृते दौर्मनस्थिता तथोपमान् जानथ सर्व्वधर्म्मान् ॥
यथा मृतास्मातरमात्मजस्था स्वप्रेति वै रोदति उच्चशब्दं ।
न तस्य मात्रा म्रियते न पुत्र तथोपमान् जानथ सर्व्वधर्म्मान् ॥
यथैव रात्रौ जल चन्द्र दृश्यते अच्छस्मि वारिस्मि अनाविलस्मि ।
अग्राह्यतुच्छो जलचन्द्रशून्यः तथोपमान् जानथ सर्व्वधर्म्मान् ॥
यथैव ग्रीष्माण मध्याह्न काले तृषाभितप्तः पुरुषो व्रजेत ।
मरीचिकां पश्यति तोयराशिं तथोपमान् जानथ सर्व्वधर्म्मान् ॥
मरीचिकायामुदकं न विद्यते स मूढ मत्वा पिवितुं तदिच्छति ।
अभूतवारिं पिवितुं न शक्यं तथोपमान् जानथ सर्व्वधर्म्मान् ॥
यथैव आर्द्रं कदलीय स्कन्धं सरार्थिकः पुरुष विपाटयेत् ।
वहिर्व्वा अध्यात्म न सारमस्ति तथोपमान् जानथ सर्व्वधर्म्मान् ॥
न चक्षु प्रामाण्यु न श्रोत्र घ्राणं न जिह्व प्रामाण्यु न कायचित्तं ।
प्रमाण यद्येति भवेयुरिन्द्रिया कस्यार्य्यमार्गेण भवेत कार्य्यं ॥

यस्मादिमे इन्द्रिय अप्रमाणा ज्ञेत्राः स्वभावेन अव्याकृताश्च ।
तस्माद्य निर्व्वाणपथेन अर्थिकः स आर्य्यमार्गेण करोतु कार्य्यं ॥
पूर्व्वादिकार्य्ये च अवेक्षमाणे नैवात्र कायो नपि कायसंज्ञा ।
न यत्र कायो नपि कायसंज्ञा असंस्कृतं गोत्रमिदं प्रवुच्चति ॥
निवृत्तिधर्म्माण न अस्ति धर्म्मा येनेति नास्ति न हि जातु अस्ति ।
अस्तीति नास्तीति च कल्पनावतां एवञ्चरन्तान न दुःख शाम्यति ॥
अस्तीति नास्तीति उभेपि अन्ता शुद्धी अशुद्धीति इमेऽपि अन्ता ।
तस्मादुभे अन्त विवर्ज्जयित्वा मध्येऽपि स्थानं न करोति पण्डितः ॥
अस्तीति नास्तीति विवाद एष शुद्धी अशुद्धीति अयं विवादः ।
विवादप्राप्ता न दुःखन्निरुध्यते स्मृतेरुपस्थान कथं कथेत्वा ॥
सुस्मृत्ति वालावयकायसाक्षी न कायसाक्षी सा च अस्ति मन्यना ।
प्रहीण तस्यो पृथु सर्व्वमन्यना चतुर्षु ध्यानेषु कथा कथैत्वा ॥
वदन्ति वालावयध्यानगोचरा न क्लेशध्यायी न च अस्ति मन्यना ।
विदित्व ज्ञानेन मदः प्रहीयते चतुर्षु सत्वेषु कथं कथेत्वा ॥
वदन्ति वालावय सत्यदर्शितः न सत्यदर्शिस्य च कावि मन्यना ।
अमन्यना सत्य जिनेन देशिता रक्षेत शीलं न च तेन मन्ये ॥
शृणेय्य धर्म्मं न च तेन मन्ये ये नैव सो मन्यति अल्पप्रज्ञा ।
तन्मूलकं दुःख विवर्द्धतेऽस्य दुःखस्य मूलमहु सन्निदर्शितः ॥
सर्व्वज्ञता लोकविनायकेन मदेन मत्ता न दुःखं प्रवर्द्धते ।
अमन्यनान दुःखं निरुध्यते विवर्द्धतेऽस्य दुःखस्य मूलं (महु सन्निदर्शितः) ॥
सर्व्वज्ञ नालोक विनायकेन मदेन मत्तान दुःखं प्रवर्द्धते ।
कियद्बहु धर्म्म पर्य्यायणेय्या शीलन्न रक्षेत श्रुतेन मत्तः ॥
न वाहुश्रुत्येन न शक्तु त्रायितु दुःशील येन व्रजमान दुर्गतिं ।
स चेत् पुनः शीलमदेन दत्ते न वाहुश्रुत्यस्मि करोति योगं ॥
क्षयेत्व सो शीलजलमशेषं पुनोपि संप्रत्यनुभोति दुःखं ।
किञ्चापि भावेय्य समाधि लोके न चो विभावेय्य स आत्मसंज्ञां ॥
पुनः प्रकुप्यन्ति किलेशु तस्य यथोदकस्येह समाधिभावना ।
निरात्मधर्म्मान् यदि प्रत्यवेक्षते तां प्रत्यवेक्ष यदि भावयेत ॥
स हेतुनिर्व्वाणफलस्य प्राप्तये य अन्यहेतू न स भोति शान्तये ।
यथा नरश्चोरगणैरुपद्रुतः पलायितुमिच्छति वीतार्थिकः ॥
न तस्य पावा प्रभवन्ति गच्छितुं गृहीत्व चोरेहि स तत्र हन्यते
एवन्नरः शीलविहीनमूढः पलायितुमिच्छति संस्कृतातः ॥
स शीलहीनो न प्रभोति गच्छितुं जराय व्याध्या मरणेन हन्यते ।





यथैव चोर गण वहूसहस्रा नानामुखेही प्रकरोन्ति पापं ॥
एवं किलेशा विविधैर्मुखेभिः यथैव रोहारनि शुक्लपादम् ।
येन स निध्यप्ति निरात्मस्कन्धाः आक्रुष्टपरिभाषु न शक्नु भोति ॥
स क्लेशमारस्य वसन्न गच्छते ये शून्यतां जानति सो न कुप्यते ।
वहूजनो भाषति स्कन्धशून्यताञ्च प्रजानन्ति यथा निरात्मकाः ॥
ते अप्रजानन्त परेहि चोदिता क्रोधाभिभूताः परुषं वदन्ति ।
यथा नरो आतुरकाय दुःखितो वहूनि वर्षेहि न जातु मुच्यते ॥
स दीर्घशैलान्यदुःखेन पीड़ितः पर्य्येष वैद्यु चिकित्सनार्थिकः ।
पुनः पुनस्तेन गवेषता च आसादितो वेद्य विदु विचक्षणः ॥
कारुण्यतान्तेन उपस्थयित्वा प्रयुक्तु भैषज्यमदन्निसेव्यतां ।
गृहीत्व भैषज्य पृथू वराणां न सेवते आतुर येन मुच्यते ॥
न वैद्यदोषो न च भैषजानां तस्यैव दोषो भवि आतुरस्य ।
एवं इही सासनि प्रव्रजित्वा पर्य्यापुणित्वाचलध्यान इन्द्रियाः ॥
न भावनायामभियुक्त भोन्ती अयुक्तयोगी न कुतोऽस्ति निर्वृतः ।
स्वभावशून्याः सद सर्व्वधर्म्माः वस्तुं विभावेन्ति जिनान पुत्राः ॥
सर्व्वेण सर्व्वं भव सर्व्वशून्याः प्रादेशिकी शून्यता तीर्थिकानां ।
न विज्ञ वालेहि करोन्ति विग्रहं सत्कृत्य वालान् परिवर्ज्जयन्ति ॥
ममान्तिके एति प्रदुष्टचित्ताः न वाल धर्म्मेहि करोति संस्तवम् ।
न विज्ञ वालान करोति सेवनां विदित्व वालान स्वभावसन्ततिं ॥
कियच्चिरं वाल सुसेवितापि पुनोऽपि ते भोन्ति अमित्रसन्निभाः ।
न विज्ञ वालेष्विह विश्वसन्ति विज्ञाय वालान स्वभावधर्म्मतां ॥
स्वभावभिन्ना प्रकृताय वालाः न चास्ति मित्रेहि पृथग्जनानां ।
सहधर्म्मि तेनो वचनेन उक्तः क्रोधश्च दोषश्च अप्रत्ययश्च ॥
प्राविष्करोन्ति इमि वालधर्म्मा इममर्थं विज्ञाय न विश्वसन्ति ।
वाला हि वालेहि समं समेन्ति यथा अमेध्येन अमेध्यु सार्द्धं ॥
विज्ञा पुनर्विज्ञजनेन सार्द्धं समेन्ति सर्पिर्यथ सर्पिमण्डे ।
संस्कारदोषाण अप्रत्यवेक्षणा कर्म्माण विपाकमनोत्तरन्ता ॥
बुद्धानचो वाक्यमश्रद्धधानास्तच्छेद्यभेद्यस्मि चरन्ति वाला ।
सुदुर्लभं लभ्य मनुष्यलाभं न शिल्पस्थानेषु भवन्ति कोविदाः ॥
दरिद्रभूता न धनन्न विद्यते अजीवमानास्तद प्रव्रजन्ति ।
ते प्रव्रजित्वा इह बुद्धशासने अध्येषिता भोन्ति ह पात्रचीवले ॥
ते पापमित्रेहि परीगृहीतास्तां नाचरन्ति सुगतान शिक्षां ।
ते आत्मनः शीलमयसमानाः चित्तव्यवस्था न लभन्ति वालाः ॥

रात्रिन्दिवं भोन्ति अयुक्तयोगाः न ते जुगुप्सन्ति न पापकर्म्मणः ।
कायेन चित्तेन असंयतानां न किञ्चि वाचा स न जल्पितव्यं ॥
सदा गवेषन्ति परस्य दोषान् पराद्गुकित्तेनत चोदयिष्ये ।
आहारिमध्योऽपि च भोन्ति वालाः न चास्ति मात्रज्ञत भोजनस्मिं ॥
बुद्धस्य पुण्येहि लभित्व भोजनं तस्यैव वाला अकृतज्ञ भोन्ति ।
न भोजनस्वादनसम्प्रणीती लब्ध्वा च भुञ्जन्ति अयुक्तयोगाः ॥
तेषां स आहारु वधाय भोजियि यहस्तियोगान विसा अवोतका ।
किश्चापि विद्वान् सति मां विचक्षणं भुञ्जीत आहारु सुविप्रणीतं ॥
स चैव अध्योषित तत्र भोति अगृध्र सो भुञ्जति युक्तयोगी ।
किश्चापि वदान् सति मां विचक्षणो आभाषते वालकु तेहि शाश्वतम ॥
तथ संगृहीत्वा प्रियनन्द्यताय कारुण्यतात्तत्र उपस्थयेति ।
या भोति वाला स हितानुकम्पी तस्यैव वाला व्यसनेन तुष्टा ॥
एतेन दोषेय जनित्व वाला मृगेव एको विहरेदरण्ये ।
इमु इदृशान्दोष विदित्व पण्डितो न जातु वालेहि करोति संस्तवं ॥
न हीनप्रज्ञानुपसेवतो मे स्वर्गान हानिः कुत बोधि लप्स्यते ।
मैत्रीविहारी च भवन्ति पण्डिता करुणाविहारी मुदिताविहारी ॥
उपेतकास्सर्व्वं भवेयु नित्यं समाधि भावेत्व स्पृशिन्ति बोधिं ।
ते बोधिं बुद्धित्व शिवामशोकां विदित्व सत्वान् जन व्याधिपीड़ितान् ॥
कारुण्यतात्तत्र उपस्थयित्वा कथा कथेन्ति परमार्थयुक्तं ।
ये ता विजानन्ति जिनान धर्म्मता मनाभिलाप्यं सुगतान सत्यम् ॥
ते धर्म्म श्रुत्वा इमु एव रूपं लप्स्यन्ति क्षान्तिं अनियानिनामिमाम् ।

गम्भीरधर्म्मक्षान्तिपरिवर्त्तो नाम नवमः ॥

---

## दशमपरिवर्त्तः ।

तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म । तस्मात्तर्हि कुमार प्रतिपत्ति सारो भविष्यामीति । एवं त्वया कुमार सदा शिक्षितव्यं । तत्कस्य हेतोः प्रतिपत्तिसारस्य हि कुमार बोधिसत्वस्य महासत्वस्य न दुर्लभा भवत्यनुत्तरा सम्यक्सम्बोधिः किमुत पुनरयं समाधिः । अथ खलु चन्द्रप्रभः कुमारभूत उत्थायासनादेकांशमुत्तरासङ्गं कृत्वा दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणम्य भगवन्तमेतदवोचत् । आश्चर्य्यं भगवन् यावत् सुभाषिता चेयं भगवता तथागतेनार्हता सम्यक्सम्बुद्धेन प्रतिपत्तिः समाध्यवतारः सुदेशितः सुप्रज्ञप्तः। भगवान् बोधिसत्वानां महासत्वानामववादानुशासनी । सर्व्वबोधिसत्वशिक्षा देशिता । स्वाध्यायाः ख्याताः सुप्रज्ञप्ताः सर्व्वतथागतगोचरोऽयं भगवन् यत्राभूमिः





सर्व्वश्रावकप्रत्येकबुद्धानां कः पुनर्वादोऽन्यतीर्थिकानां प्रतिपत्तिसाराश्च वयं भगवन् भविष्यामः । अनपेक्षाः कायजीविता भूत्वा तथागतेभ्योऽनुशिक्षिष्यामहे । तत्कस्यहेतोः । शिक्षितुकामा वयं भगवन् तथागतस्य अभिसम्बोद्धुकामा वयं भगवन् अनुत्तरायाः सम्यक्सम्बोधेः अनर्थिका वयं भगवन्ननुत्तरायाः सम्यक्सम्बोधेः विध्वंसयितुं कामाश्च वयं भगवन् मारः पापीयान् स तं मोचयितुं कामाश्च वयं भगवन् सर्व्वसत्वान् सर्व्वरूपेभ्यः सर्व्वदुःखेभ्यः । ददातु मे भगवान् मूर्ध्नि दक्षिणं पाणिं । तत्रेदमुच्यते ।

खसमा विरजा वररूपधरा अशरीर अलक्षण प्रज्ञसूता ।
सुगम्भीरगुणोदधिकारुणिका दद मूर्ध्नि पाणि मम अप्रतिमा ॥

एवमुक्ते भगवाननेककुशलमूलः निजं विचित्रलक्षणालङ्कृतं दिव्यं सुवर्णवर्णं दक्षिणं पाणिं चन्द्रप्रभस्य कुमारभूतस्य मूर्ध्नि स्थापयामास । समनन्तरस्थापिते च भगवता चन्द्रप्रभस्य कुमारभूतस्य मूर्ध्नि दक्षिणे पाणावथ तत्क्षणमेव चन्द्रप्रभस्य कुमारभूतस्य सर्व्वरूपसन्दर्शन-मनोज-गगणगञ्जवज्रोपमशूरं गमनावरणकोटी-सर्व्वतथागतसन्दर्शन-सर्व्वशून्यताभिषेकप्राप्त प्रमुखान्यनेकानि प्रज्ञापारमितानिर्जातान्यनेकानि समाधिकोटिनियुतशतसहस्राणि अभिलाप्यान्यानभिलाप्यान्यामुखीभूतान्यभूवन् । अनेकानि च धारणीविमोक्षपदान्यामुखीभूतान्यभूवन् । दिव्यस्यानौपम्यमुदारं सर्व्वबुद्धबोधिसत्वगोचरविदितं प्रीतिसुखं प्रतिलब्धवान् यत्तदार्य्यो वक्ष्यते । तत्रेदमुच्यते ।

मालावनद्धरुचिरं कलनालकुणाकं श्रीवत्सचक्रध्वजमीनपताकचित्रं ।
बहुकल्पकोटिरतदानविसर्गप्रषण्डं चन्द्रप्रभस्य भगवान् स्थवि मुर्ध्नि पाणिम् ॥

अथ खलु चन्द्रप्रभकुमारभूतो दिव्येनाचित्तेनोदारेण सर्व्वबुद्धबोधिसत्वगोचरविदितेन प्रीतिसुखेन समन्वागतो उत्थायासनादेकांशमुत्तरासङ्गं कृत्वा दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणम्य भगवन्तं सारूप्याभि गाथाभिरभ्यष्टावीत् ।

नमोऽस्तु ते अभयद्दा अनुत्तरा नमोऽस्तु ते परहितसत्वबान्धवा ।
नमोऽस्तु ते दशवलसत्यविक्रमा नमोऽस्तु ते असमसमा तथागता ॥
वन्दे नाथं अतिकारुणिकं वन्दे शूलं चतुरारिजितं ।
वन्दे वीरं परमार्थविदं वन्दे देववरधर्म्मतन्तुं ॥
सुविशालप्रज्ञनप्रज्ञ नभमण्डलोदितं कृप मैत्ररश्मि जिनसूर्य्यदानम् ।
सुगम्भीरधर्म्मपरमार्थदेशकं शरणं गतोऽस्मि तव देव नित्यहं ॥

अथ खलु चन्द्रप्रभः कुमारभूतो भगवन्तं सारूप्याभि गाथाभिरभिष्टुत्य भगवन्तमेतदवोचत् । अधिवासयतु मे भगवान् श्वस्तनया ममगृहे भक्तं भोक्तुं सार्द्धं बोधिसत्वसंघेन चानुकम्पामुपादाय । तत्रेदमुच्यते ।

अभियाचमि स सुनरेन्द्रं शुचि मम मन्दिर भुञ्जितु भक्तं ।
अधिवासतु सुरवरनाथो मय्यनुकम्पायमान मुनीन्द्रो ॥

अधिवासयति स्म भगवांश्चन्द्रप्रभस्य कुमारभूतस्य तूष्णींभावेन श्वस्तनया गृहे भक्तं भोक्तुं सार्द्धं बोधिसत्वसंघेन चानुकम्पामुपादाय । अथ खलु चन्द्रप्रभः कुमारभूतो भग-

वतस्तूष्णींभावेनाधिवासनं विदित्वा उत्थायासनादेकांशमुत्तरासङ्गं कृत्वा भगवतः पादौ शिरसाभिवन्द्य भगवन्तन्त्रिः प्रदक्षिणीकृत्य भगवतोऽन्तिकात् प्राक्रामत् । अथ खलु चन्द्रप्रभः कुमारभूतो गृध्रकूटात् पर्व्वतादवतीर्य्य तस्याम्वेलायां यावच्च राजगृहं महानगरं यावच्च गृध्रकूटः पर्व्वतराजोऽत्रान्तरे सर्व्वमार्गं समं कारयति स्म । विपुलं विस्तीर्णमपद्मकुमुदपुण्डरीकसौगन्धिकानि मुक्तकमल्लिकाचम्पकपाटलकुन्दतिलककेशराशोकादिभिस्सर्वैस्सर्व्वर्त्तुकैः पुष्पवरैः संछन्नमवसक्तपट्टदामकलापमाल्यदामालङ्कृतं नानारत्नधूपघटिकावलम्बितपार्श्वम् सर्व्वांश्च ता रत्नधूपघटिका अगुरुपूर्णा धूपायन्ते । समुच्छ्रितं छत्रध्वजपताकावैजयन्तीदिव्यरत्नतोरणवितानं । देशेदेशे च नटनर्त्तकान् नर्त्तनगीतवाद्यसुनिबद्धसुशिक्षितान्निवेशयति स्म । अनेकाः च तूणववीणावेणुमृदङ्गमुकुन्दमुरजोपेताः स्त्रीपुरुषदारकदारिकाः स्वलङ्कृताः स्थापयति स्म । मार्गस्य चोभयपार्श्वया दिव्या जाम्बूनदसुवर्णमया नानारत्नकिंकिनीजालावनद्धमुखेनावृत्तानुत्तुङ्गोत्तालान्नानारत्नमयान्यनेकानि व्योमकोटीनियुतशतसहस्राणि सप्तरत्नमयांश्च नानावृक्षान्नानापरिणाहसम्पन्नान् सर्व्वर्त्तुकपुष्पपत्रफलोपेतान् स्थापयति स्म । यदुत भगवतः पूजाकर्म्मणे । तत्रेदमुच्यते ।

सुप्रतिमण्डित मार्गं विचित्रं उच्छ्रितछत्र पताकवितानं ।
सुप्रतिनादित तूर्य्यवरेणो तथ पि चं गीतवरेण मनोज्ञां ॥
नटनर्त्तकनारिगणो बहुभिः सुविचित्रवस्त्रनियुतैर्विविधैः ।
स सुगन्धिचित्रकुसुमैश्च वरैः प्रतिमण्डितो विपुलमार्गवरः ॥
मण्डितु मात्त उदारु विशालं चन्द्रप्रभेण प्रसादु जनित्वा ।
बुद्ध प्रवेक्ष्यति पुरवरु तेन सुचि इह कारुणिको मुनिचन्द्रः ॥
सुचिवालिक संस्तृतु दिव्यां च्छादितु पुष्पवलैः सुमनोज्ञैः ।
सुसमुच्छ्रितु तोरणरत्नै भाँसति मात्तपुरे मराणो ॥
तथलङ्कृतु मार्गु विचित्रं चन्द्रप्रभेण प्रसन्नमनेन ।
यत्त ते दृष्ट्वा ससुरासुरनागा विस्मयजात अहोति भणन्ति ॥
ताला स्थापित पार्श्वयो वरवरन्तुङ्गा सजंबूनदा ।
नद्धा किङ्किणिरत्नजालमुखरावृत्ता बहूनेकशः ॥
तथपि च स्थापित रत्नवृक्षनियुताः सर्व्वत्तुका पुष्पिता ।
येहि मार्गवरो विभाति विपुलः स्वर्गे यथा नन्दनं ॥
व्योमापीरन्तनामयाः सुरुचिराः ज्वालावलीभास्वराः ।
मार्गे स्थापित पार्श्वयोः निरुपमास्तुङ्गा पृथुसहका ॥
येही मण्डितु मार्गु शोभितु महाविभ्राजते सर्व्वतः ।
येनो राजगृहं प्रवेक्षति पुरं बुद्धस्त्रिकालाधिपः ॥
रत्नघटा अवलम्बित पार्श्वस्ते च प्रपूरितकाल गुरूणां ।
उत्थित धूप घटेषु दिव्युविकारु सुगन्धिचित्रो ॥





पृथुभूषितु निरुपमु दिव्यं चन्द्रप्रभेण जिनस्य कृतेन ।
यो च न तेरित पोतदुवारं सो वच गृध्रकूट गिरिराजा ॥

अथ खलु चन्द्रप्रभः कुमारभूतोऽवान्तरसर्व्वमार्गमनेकविचित्ररत्नविकारप्रकामव्यस्तमार्गमलङ्कृतं कृत्वा गृध्रकूटात् पर्व्वतादवतीर्य्य येन राजगृहं महानगरं येन च दिव्यः तुङ्गविशालोदारस्सन्निवेशनस्तेनोपजगाम यत्र स्वनिवेशनं प्राविशत् प्रविश्य तामेव रात्रिं प्रभूतं प्रणीतं स्वादनीयं भोजनीयं खाद्नीयं अभिसंस्कारयति स्म । शतरसञ्च भोजनं सम्पाद्यित्वा तस्यामेव राव्यां अन्यायेन राजगृहं महानगरं सुशक्तं सुसंमृष्टं मुक्तकुसुमाभिकीर्णं धूपेन धूपितं तितानविततमनुसक्तपट्टदामकलापं समुच्छ्रितछत्रध्वजपताकमेवं राजगृहं महानगरं सरथ्यान्तरापणमध्यगतपाषाणशर्करकटल्लुम्बिविचित्रपुष्पाभिकीर्णं चन्दनचूर्णाभिकीर्णद्रवाक्त तोरणनिर्य्यूहयं जरज्जालार्द्धचन्द्रसमलङ्कृतं चन्दनानुलिप्तमकार्षीत् । इत्येवमपरिमाणया व्यूहया राजगृहम्महानगरं समलङ्कृत्य स्वच्छनिवेशनमनेकानेकविचित्रप्रकारविभूषितमनेकरत्नहारविहारप्रतिमण्डितं दिव्यतुषितकायिकवस्त्रं प्रतिमण्डितमशोभतोपचारविविधविचित्रमाल्यदामालङ्कृतं च कारयति स्म । अनेकानि च रत्नमयान्यासनकोटीनियुतसहस्राणि प्रज्ञापयति स्म । मध्ये च भगवतः देवमनुष्यातिक्रान्तं दिव्यं सिंहासनं प्रज्ञापयति स्म । नानारत्नमयाश्च धूपघटिकाश्चतुर्द्दिशमवलम्बयति स्म ॥

तासु च शुद्धमगुरु धूपायन्ते यदुत भगवतः पूजाकर्म्मणे दिव्यनृत्यगीतवाद्यनिनादितसमुच्छ्रितछत्रध्वजपताकामनेकदेवनागयक्षगन्धर्व्वासुरगरुड़किन्नरमहोरगमनुष्यामपुष्यशतसहस्रसमूहाकीर्णावलोकितं विविधविचित्ररत्नपुष्पावकीर्णञ्चन्द्रप्रभः कुमारभूतस्तं गृहवरमकार्षीत् । यदुत भगवतः परिभोगाय तत्रेदमुच्यते ।

प्रतिमण्डित गृहवरु सर्व्वश्चन्द्रप्रभेन उदारु विशालं ।
दिव्यु सिंहासनु मध्यनिविष्टं यत्र निवत्स्यति लोकप्रदीपः ॥
आसनकोटिसहस्र अनन्ता स्थापित रत्नमया सुविचित्राः ।
येषु निवत्स्यति संघगुरुस्य लोकप्रदीपकरस्य जिनस्य ॥
अवलम्बित सर्व्वदिशासु अगुरु प्रपूरिय धूपघटाश्च ।
रत्नमयसत्व विचित्राः तेषु च उत्थितु धूप मनोज्ञ ॥
बहु रत्नपुष्परुचिरैः विविधैः ससुगन्धिचित्रकुसुमैश्च वरैः ।
आकीर्णु वेश्मवर धरणितलं चन्द्रप्रभेण दशवलमगणोः ॥
तथ नागयक्ष असुरैर्बहुभिः आलोकितश्च बहुदेवशतैः ।
चन्द्रप्रभस्य मव भवनवरम् . . . . . . . . . . . ॥

अथ खलु चन्द्रप्रभः कुमारभूत इत्येवमपरिमाणया व्यूहया राजगृहं महानगरं समलङ्कृत्य स्वच्छनिवेशनमनेकालङ्कारविचित्रं कृत्वा तस्यामेव वेलायां महति प्रत्यूषकाले समये मानातूर्य्यशतैः प्रवाद्यमानैः उच्छ्रितछत्रध्वजपताकाकोटीभिरनेकाभिरत्युच्छ्रिताभिर्गीत्या च बोधिसत्वकोटीनियुतसहस्रैः सार्द्धं सर्व्वैर्दिव्यमान्दारपुष्पभरिताञ्जलिपुठाः सोचित् तस्यैकजाति-

बहुा बोधिसत्वा महासत्वा यद्गुतावलोकितेश्वर-महास्थानप्राप्त-गन्धहस्ति-रत्नकेतु-रत्नसम्भव मञ्जुश्री-कुमारभूत-वीरसेन-सुबाहु-रत्नकुमारामोघदर्शि-मैत्रेय प्रभृतयः । एततूपूर्व्वङ्गमेन महता बोधिसत्वगणेन परिवृतः पुरस्कृतो अनाराह स्वलङ्कृतानेकहस्त्यश्वरथसमूहसम्मिश्रया च इतरया अपरिमाणया जनपदव्यूहया स्वयञ्च दिव्यमान्दारवपुष्पभरिताञ्जलिमहता बोधिसत्वानुभावेन महता बोधिसत्वविकुर्व्वितेन मनोज्ञ मनोज्ञैः मनोहरैः बोधिसत्वहाहाकारकिलिकिलाप्रक्ष्वेडितशब्दं श्रूयन्ति राजगृहस्महानगरन्तथा द्वारेण निष्क्रम्य येन गृध्रकूटः पर्व्वतराजः येन च भगवांस्तेनोपसंक्रम्य भगवतः पादौ शिरसाभिवन्द्य भगवन्तन्त्रिः प्रदक्षिणीकृत्य दिव्यमान्दारवपुष्पाञ्जलिना च भगवन्तमभ्यवकीर्य्य एकान्तेऽस्थात् । तेऽपि मैत्रेयप्रभृतयो बोधिसत्वा महासत्वा भगवतः पादौ शिरसाभिवन्द्य भगवन्तन्त्रिः प्रदक्षिणीकृत्य स्वाभिः दिव्यमान्दारवपुष्पाञ्जलिभिर्भगवन्तमभ्यवकीर्य्य एकान्ते तस्थुः । एकान्तस्थितश्चन्द्रप्रभः कुमारभूत उत्थायासनादेकांसमुत्तरासङ्गं कृत्वा दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणम्य भगवतः कालमारोचयति स्म । कालो भगवन् समयः सुगत स तं भक्तं यस्येदानीं भगवान् कालं मन्यसे सार्द्धं बोधिसंघेन भिक्षुसंघेन चान्यैश्च महेशाख्यैरुदारोदारैः देवनागयक्षगन्धर्व्वासुरगरुडकिन्नरमहोरगकुम्भाण्डप्रेतपूटनमनुष्यामनुष्यैरपि सार्द्धं राजगृहस्महानगरं प्रवेष्टुं मम च गृहे भक्तं भोक्तुं । तत्रेदमुच्यते ।

समलङ्कृतुमपि पुरुपरु सर्व्वन्तथरं मन्दिरु मण्डितु नाथा ।
सज्जितु शतरस भोजनदिव्यं काल तथागत उत्थिहि सुगता ॥
दशबल गुणधर ऋद्धिवर नमिता सुरगणपरिवृतु प्रविश हि नगरं ।
उत्थिहि दिनकरु रत्ननिकरहासे समयुत भगवान् मम गृह भोक्तुं ॥
सतसहितादर गच्छिय गेहं भेष्यति अर्थ महांतु जनस्य ।
पृथु तुह व्याकृतु दीपकरेणो तथ मम व्याकरि लोकसमक्तं ॥
व्याकरणं मम श्रुत्विह लोको चिन्तु जनेष्यति सूत्र उदारं ।
बुद्ध भविष्यति सव्वजगोयं नास्तिह कश्चिदभोजनु सत्वो ॥
उत्थिहि दशबल देवा कुरु ममनुग्रहु गच्छिय गेहम् ।
यथ तुहु यास्यसि मन्दिरु मह्यं तथ अहु यास्यामि बोधिद्रुमेन्द्रं ॥
तत्र च गन्धहु बोधिद्रुमेन्द्रं बद्धा आसनु अचल अकम्पं ।
भञ्जिय मानुष सेनकुमह्या प्राप्स्यसि बोधि यथा त्वयि प्राप्ताः ॥

अथ खलु चन्द्रप्रभस्य कुमारभूतस्यारोचनां विदित्वा चन्द्रप्रभं कुमारभूतं गाथाभिः प्रत्यभाषत ।

उत्थिहि चन्द्रप्रभा जिनपुत्रा उत्थिहि दानरता वरसत्वा ।
उत्थिहि कारुणिका दृढ़शीला यामि त भोक्तु निवेशनमह्य ॥

अथ खलु भगवानिमां गाथां भाषित्वा उत्थायासनात्तस्यैव निवास्य पात्रचीवरमादाय महता भिक्षुसंघेन सार्द्धं परिपूर्णेन भिक्षुशतसहस्रेण संबहुलैश्च बोधिसत्वैर्महासत्वैः





परिवृतः पुरस्कृतानेकैश्च देवनागयक्षगन्धर्व्वासुरगरुडकिन्नरमहोरगकुम्भाण्डप्रेतपूतनमनुष्यामनुष्यशतसहस्रैः पूज्यमानोऽभिष्टूयमानः । महता च बुद्धानुभावेन महत्या बुद्धऋद्धा महता बुद्धप्रातिहार्य्येण महता बुद्धैर्य्यापथेन रश्मिकोटिनियुतशतसहस्रैः निःसरद्भि नानातूर्य्यकोटीनियुतशतसहस्रैः प्रवाद्यमानैः छत्रध्वजपताकाकोटीभिरनेकाभिरत्युच्छ्रिताभिर्नानाविचित्ररूपवर्णोदारैरनेकैर्हंसक्रौञ्चचक्रवाकसारसचकोरमारचासशुकशारिकाकलविङ्ककुणालप्रभृतिभिः सर्व्वशकुनिगणवृन्दैरनेकप्रकारैः प्रियमधुरमनोज्ञभाषिभिः भ्रमरमिवान्तरीक्षे वाद्यविशेषं स्वरवं कुर्वद्भिर्दिव्यविचित्ररुचिररत्नमयैश्च उदारोदारैरनेकधूपघटिकानियुतशतसहस्रैः सर्व्ववैदुर्य्येन्द्रनीलस्फटिकमुसालगल्वदनैरिन्द्रकेतुसुरूपविकटवकुलपाश्चिकशाक्यप्रवर्द्धनप्रभृतिभिरनेकैर्यक्षेन्द्रकोटीनियुतशतसहस्रैः उभयहस्तमूलपगृहीतैरुरगसारगोशीर्षैर्मृणालहरिमलतमालपलोहितचन्दनागुरुपरिपूर्णैः धूपायमानैर्नानादिग्देशागतैश्च महेशाख्यमहेशाख्यैः भूपालैः अनारोहस्वलङ्कृतानेकसमूहहस्त्यश्वरथप्रवादिपरिवृतैर्महामाल्यदामरत्नमापाणिपरिगृहीतैः पुरतः पद्भ्यां गच्छद्भिरनारोहैश्च तैः स्वलङ्कृतैर्हस्त्यश्वैः । सलीलमदखेदरमणाभिप्रायैः सुमनोज्ञमनोहरैः व्रजद्भिः ब्रह्मा च दक्षिणेन भगवतः पूजोपस्थानपरिचर्य्यां कुर्व्वन् गच्छति स्म । वामेन च शक्रो देवानामिन्द्रो गणनासमतिक्रान्ताश्च महेशाख्यमहेशाख्या उदारोदारा देवपुत्राः दिव्याम्बरमुकुटकेयूरकुण्डलाङ्गदवकयावतंसकरत्नसूत्रपुष्पदामकालङ्कृतशरीराः अनन्तहितात्मभावाः दिव्यमान्दारवरोचककोविदार स्थालककुरवकचम्पककर्णिकारापटलोतिमुक्तोत्पलतिलककुलमल्लिकाकुन्दकेशरा पद्मकुमुदपुण्डरीकसौगन्धिकरत्नदामकरत्नागुरुरत्नफलतरुव्यग्रहस्ता नानातूर्य्यशतसहस्रान्नादयन्तो स्वरकोटीर्भामयन्तः हाहाकिलाप्रक्ष्वेडितशब्दान् प्रमुञ्चयन्तो महापुष्पवर्षं प्रावर्षयन्तः सर्व्वंगगनतलं निरन्तरमापूर्य्य स्थिता भगवतः पुजाकर्म्मणा पुष्पधूपगन्धमाल्यविलेपनवर्णचीरकिलऽँवरछत्रध्वजपताकारत्नवर्षञ्च प्रवर्षद्भिः भगवांस्त्रिपोतद्वारेण राजगृहम्महानगरं भोक्तुं प्रतिवशति स्म । इयमत्र धर्म्मता तत्रेदमुच्यते ।

कालु विदित्व तथागत बुद्धो प्रक्रमते भगवान्नरसिंहः ।
सर्व्वगुणो समलङ्कृतवीरो भासयमानु अचिन्तिय क्षेत्रं ॥
तत्र वलाकितु स्थासु अमोघो गन्धहस्तीपि च रत्न सुबाहू ।
रत्नकेतुदुरभिसंभववीरो एक्षिवान्यि जिनचन्द्रनुबद्धा ॥
दक्षिणतो अजि तस्थितुमस्या मैत्रकुरामा अनन्तगुणाढ्याः ।
योऽस्य अनन्तर भेष्यति बुद्धो पुण्यज्ञानपरिपूरितभावः ॥
मैत्र्युपेक्षमुदभावितकाये करुणा या च जनितस्य महात्मा ।
धर्म्ममया पर्य्यन्तगुणेभिश्चिन्तयमान मुनीन्द्रगुणानी ॥
कारुणिकं सुगतं अनुबन्धी तस्यन्तरुपान्तक केचित् ।
भद्रककल्पि महामुनिमन्त यस्य तुरणकु बुद्धसहस्रा ॥
तेऽपि पुरस्कृतु मैत्रकु तत्र येन पूर्व्वि परि राजगृहस्मिं ।
कल्प कल्पि जिन पूजितनन्ताः . . . . . . . . . ॥

चन्द्रकान्तिप्रभ दिव्यशरीरो चन्द्रप्रभः पुरतः स्थितु तत्र ॥
वामस्थितो वरकारुणिकस्य मञ्जुश्रिरी बहुकोटिशतेभिः ।
ऋद्धिगुणाभि समुद्गतु श्रुत्वा क्षेत्रशतानि अनन्त व्रजन्तो ॥
तस्य अनन्तरु श्रावकसंघा शारि श्रुतो वसु कालि तु कालो ।
काश्यप कफिन नन्दु सुभूती भद्रिकुमारु तथापि कौण्डिलो ॥
आनन्द तथ राहुलस्थविरो सो गतु काश्चिकु पूर्ण उदायी ।
रेवतु कोष्ठिल पालिनिसह्वो तर्जटिलोचन पूर्णसहस्रम् ॥
श्रावकसंघि अनन्तरि सर्व्वं उग्रतया व्रतवेदविधिज्ञा ।
शाप अनुग्रह दानसमर्था प्राञ्जलिप्रक्तक्कता ऋषिदाराः ॥
शान्तमनाथ तदान्तमनेभिः बुद्ध पुरस्कृतु लोकप्रदीपो ।
प्रविशति कारुणिको नरसिंहो प्राणिसहस्रं मोचयमानो ॥
कार्त्तिकपूर्णमि चन्द्र यथैव तारगणाधिपती परिशुद्धो ।
ब्रह्मसहस्रशतेभिः अप्रतिमो परिवारितु शास्ता ॥
यस्वरणोपरि वारि निक्षिप्तो कम्पित मेदिनि सर्व्वनिषण्णा ।
देवमहोरगदानवसंघा पुष्प क्षिपन्ति शुभाम्बरगन्धं ॥
पुष्प क्षिपित्व शुभाम्बरगन्धं चन्दनचूर्ण उदारु विचित्रां ।
कृत्व प्रदक्षिण कारुणिकस्य बोधिय ते प्रणिधिं प्रकरोन्ति ॥

समनन्तरनिक्षिप्तश्च भगवता दक्षिणचक्ररत्नालङ्कृतमपरिमितकुशलमूलसंचित इन्द्रनीलपादः । यथायं त्रिसाहस्रमहासाहस्र लोकधातुः षड्विकारं कम्पितः प्रकम्पितः संप्रकम्पितः । चरितः प्रचरितः संप्रचरितः । वेधितः प्रवेधितः संप्रवेधितः । क्षुभितः प्रक्षुभितः संप्रक्षुभितः । रणितः प्ररणितः संप्ररणितः । गर्ज्जितः प्रगर्ज्जितः संप्रगर्ज्जितः । पूर्व्वा दिगवनमति । पश्चिमा दिगुन्नमति । पश्चिमा दिगवनमति । पूर्व्वा दिगुन्नमति । उत्तरा दिगवनमति । दक्षिणा दिगुन्नमति । दक्षिणा दिगवनमति । उत्तरा दिगुन्नमति । अन्तादवनमति । मध्यादुन्नमति । मध्यादवनमति । अन्तादुन्नमति । महतश्चावभासश्च लोकप्रादुर्भावोऽभूत्। अन्यानि चाप्रमेयान्यसंख्येयानि च आश्चर्य्याद्भुतानि प्रतिहार्य्याणि संदृश्यन्ते स्म । इयमत्र धर्म्मता तत्रेदमुच्यते ।

पुरवरु प्रविशन्ति नायकेनो चरणवरु स्थापितश्च इन्द्रकीले ।
चलित वसुमती स्थिरीय तस्य प्रमुदित भोन्ति पुरोत्तमस्मि सत्वाः ॥
ये नर क्षुधिता पिपासिता वा न भवति तेष जिघत्सु तस्मि काले ।
अपगत भवति क्षुधापिपासा पद जिन निक्षिपतीन्द्रकीलपादं ॥
तथ पुन नर ये भवन्ति अन्धा श्रोत्रविहीन अनाथ अल्पपुण्या ।
सर्व्वि प्रतिलभन्ति चक्षु श्रोत्रं पद जिनु निक्षिपतीन्द्रकीलपादं ॥
यमविषय ये केचि भोन्ति प्रेताः सुदुःखितखेट सिंहासन भोजनासाः ।





सर्व्व सुखित भोन्ति आभस्पृष्टाः यद जीनु निक्षिपतीन्द्रकीलपादं ॥
शैलशिखरपृष्ठकूपर्व्वताश्चो तथवर पादसालकर्णिकायाः ।
सर्व्वि अभिनमन्ति येन बुद्धो यद जिन निक्षिपतीन्द्रकीलपादं ॥
स नगरनिगमा स सातरन्ता प्रचलि वसुन्धरि षड्विकारि सर्व्वाः ।
न च भवति विहेठकस्य चेष्टा यद जिनु निक्षिपतीन्द्रकीलपादं ॥
मरुमनुजकुम्भाण्डराक्षसाश्चो नभस्थित तुष्ट उदग्र हृष्टचित्ताः ।
छत्र धरिय लोकनायकस्य परमपरीत जनित्व बोधिछन्दं ॥
श्रूयति च मनोज्ञ वाद्यशब्दो तूर्य्यसहस्र अघटिता रणन्ति ।
प्रमुदित तद भोन्ति सर्व्वसत्वा यद जिनु निक्षिपतीन्द्रकीलपादं ॥
वृक्ष शतसहस्र ओनमन्ती सर्व्वि प्रपुष्पित भोन्ति तस्मि काले ।
देव शतसहस्र अन्तरीक्षे पूज करोन्ति अमानुषी जिनस्य ॥
ऋषभगण तता नदन्ति हृष्टाः हय विरदाधिपती प्रहृष्टकायाः ।
मृगपतय नदन्ति सिंहनादं यद जिनु निक्षिपतीन्द्रकीलपादं ॥
महिपतय केचि भूमिपाला दिशि विदिशासु च आगता भवन्ति ।
धरणितलि पतन्ति हृष्टचित्ताः दृष्ट जिनस्य शिरीमि मेवरूपं ॥
अन्य अभिस्तवन्ति लोकनाथं अपरि क्षिपन्ति जिनस्य पुष्पवृष्टिं ।
अपरि दशनखाञ्जलिं करित्वा अहो जिन कारुणिकोति हरन्ति वाचं ॥
केचि वर क्षिपन्ति मुक्तहारां बहुविध आभरणा जनेत्व प्रीतिं ।
विवररतनां क्षिपन्ति अन्ये अतुलियु अग्रज नेत्व बोधिचित्तं ॥
केचि वर क्षिपन्ति हेमजालामपरि पुनर्मुखफुल्लकं क्षिपन्ती ।
केचि वर क्षिपन्ति हेमनिष्कांस्तथ अपरे परिहारकां क्षिपन्ती ॥
कटकवर क्षिपन्ति केचि तत्र अपरि केयूर क्षिपन्ति रत्नचित्रां ।
अम्बरकुसुमां क्षिपन्ति अन्ये चित्त जनेत्व सियां वयं विबुद्धाः ॥
अपरि नर क्षिपन्ति हेमसूत्रांस्तथ मणिचूडथ प्रसन्नचित्ताः ।
केचि रतनजालिकां क्षिपन्ति द्वारि पदास्थितु भोति लोकनाथः ॥
परमदुःखित ये भवन्ति सत्वाः बहुविधु पदवु शोकशल्यप्रासाः ।
सर्व्वसुख सति भवती पुरुषवरस्य शौरीय नायकस्य ॥
परिहृत्त शुकशारिका मयूरास्तथपि च सारस चापहं क्रौञ्चाः ।
सर्व्विं द्विजगणा नभे स्थिहित्वा परममनोज्ञरुतानि व्याहरन्ति ॥
प्रमुदित तद भोन्ति पक्षिसंघाः मधुमनोज्ञरुतं प्रमुञ्चमानाः ।
रागु तथ समेन्ति दोषमाहं ये च शृणोति मनोज्ञपक्षिशब्दां ॥
शुणिय रजनीय सत्वकोट्यः सर्व्विं लभन्ति रक्षन्ति मानुलोमान् ।
याश्च सुगतु व्याकरो सर्व्वां भविष्यथ यूयं जिना अनागतेस्म ॥

न च भति क्लेशु तस्मि काले सर्व्विष गौरव भोन्ति धर्म्मराजा ।
अपगतमल दोषमोहजाला प्रतिपत्तिषु सुगतस्य तिष्ठवन्तः ॥
पश्यिय तद रूपु नायकस्य स्पृह जनयन्ति वरस्मि बुद्धज्ञाने ।
कदवय लभे ज्ञानमेव रूपं आशयु ज्ञात्व जिनोऽस्य व्याकरोति ॥
तस्मि शतसहस्र निश्चरन्ति एकीकता सुगतस्य रोमकूपात् ।
त इतरिय गङ्गवालिकावा नपि च निमित्त गृहीत्व शक्तु तासां ॥
सूर्य्यप्रभ तलन्ति तस्मि काले नपि मणिनाग्नि न सर्व्वदेवतानां ।
सर्व्वि प्रभ न भान्ति तस्मि काले यद प्रविशन्ति पुरं विभाति बुद्धो ॥
पद्मशतसहस्रप्रादुर्भूता धरणि तु कोटिसहस्र यत्र शुद्धाः ।
यत्र दशवल स्थपेति पाद मार्गगतः सुगतो गणेन ॥
अशुचिकरमला न भान्ति तस्मि काले नगरवनं प्रविशन्ति नायकस्मिं ।
अगुरुसुरभि सर्व्वि धूपनेना गन्धमनोज्ञ प्रवायते समन्तात् ॥
वीथि नगरि शुद्ध भोन्ति सर्व्वा अपगत लोष्ट कठल्लशिक्तगन्धैः ।
पुण्यदशवलस्य एव रूपा विविध विकीर्णु भवन्ति मुक्तपुष्पाः ॥
यच्च शतसहस्र रौद्रचित्ता कनकनिभं द्विपदेन्द्र दृष्टबुद्धं ।
जनयि विपुलु नायकस्मि प्रेमं शरणमुपेति च बुद्धधर्म्मसंघान् ॥
ये च शतसहस्रकोटियो वा उपगत सर्व्वि नरेन्द्रदर्शनाय ।
वर्षति सुगतस्य पुष्पवर्षं गगणतले च स्थिहन्ति मुक्तपुष्पाः ॥
ये मनुज क्षिपी जिनस्य पुष्पाः गगणतले भवती पुष्पछत्रं ।
यत्पुन कुसुमां क्षिपन्ति देवाः धरणितरे स्थित भोन्ति दिव्यपुष्पाः ॥
न च भवति कदाचिदष्टतृप्ती देवमनुष्यकुम्भाण्डराक्षसानां ।
यद दशवलदृष्ट लोकनाथां प्रमुदित भोन्ति उदग्र कल्पचित्ताः ॥
न मनसि तद भोन्ति दिव्यपुष्पा न च पुन विस्मय जायते च तत्र ।
यद पुरुषवरस्य काय दृष्टा तुष्ट भवन्ति उदग्र सर्व्वसत्वाः ॥
ब्रह्म दशवलस्य दक्षिणेनो तथ पुन वाम तु शक्र देवराजा ।
गगणतलगता अनल्पदेवकोट्यः पुरुषवरस्य जनेन्ति चित्रिकारं ॥
परिवृतु जिन देवदानवेहिं मनुमनुजानगिरिब्रह्म सर्व्वान् ।
धरणिक्रमतले हि चित्रयन्तो प्रविशिय तान् भगवान्निमन्त्रयाम ॥
कुसुमितु अनुव्यञ्जनेहि काया यथ गगणं परिपूर्ण तारकेहि ।
प्रत परिस्थितु राजसागि बुद्धः चक्रु नभस्य यथैव पूर्णिमास्याम् ॥
मणिरतन यथाविशुद्ध येषु व्यपगतदोषमल प्रभासमानं ।
दिशि विदिशि प्रमुञ्चि आभ शुद्धा तथ जिनु भाषति सर्व्वं लोकधातु ॥
अपरिवृतु जिन देवदानवेही प्रविशति राजगृहं नराण श्रेष्ठः ।





धरणिक्रमतलेहि चित्तयन्तो प्रविशति चन्द्रप्रभस्य नाम बुद्धः ॥
पुरवस सममलङ्कृतं समन्ताद्बहुध्वजकोटिसहस्र उच्छ्रितान्न ।
गन्धवर विलिप्त सर्व्वभूमि सुमनप्रकीर्ण तथैव वाशिका च ॥
यद सुगतु कथां कथेति नाथो वीथिगतो मनुजान् कृपायमानः ।
निर्म्मितु जिन तत्र निर्म्मिणित्वा विचरति तेषु प्रणीत बुद्धधर्म्मान् ॥
दशनियुत जिनस्य निर्म्मितानी कनकनिभा अभिरूपदर्शनीयाः ।
परिवृतु जिन तत्र निर्म्मितेही विचरति शून्यत शान्तबुद्धबोधिं ॥
प्राणिशतसहस्र तं शृणित्वा प्रणिदधि जिनुवराग्र बुद्धज्ञाने ।
कदवय लभि ज्ञानमेवरूपं आशयु ज्ञात्व जिनोऽस्य व्याकरोति ॥
केचि स्पृह जनेन्ति तत्र काले परम अचिन्तिय तेहि लब्धलाभा ।
येहि जिनु निमन्त्रितो नरेन्द्रो न च पर्य्यन्तु स तेषु दक्षिणायाः ॥
केचि पुनरुपपादयि सुचित्तं श्वो वयं कारुणिकन्निमन्त्रयामः ।
हितकरुमनुकम्पकं प्रजानां यस्य सुदुर्लभं दर्शनं भवेयुः ॥
केचि स्थितु नियुहखोटकेहि सुभगुविभूषितगात्रप्रेमणीया ।
दिव्यदशवलस्य मुक्तपुष्पा शाव किरतेऽग्रु जनित्व बोधिचित्तं ॥
सुरुचिर वरचम्पकस्य माला तथ अतिमुक्तक गन्धवर्षिका च ।
अपरि पुन क्षिपन्ति पट्टदामां परमनिरुत्तम चित्तु सञ्जनित्वा ॥
केचि स्थित गृहे गृहीत्व पुष्पान् परमविभूषितुकायु चीवलेहि ।
पुष्प विवध गृहीत्व पट्टदामां प्रविशितु येन जिनो महानुभावः ॥
पदुम कुमुद उत्पलान् क्षिपन्ति अपरि क्षिपन्ति विशिष्ट हेमपुष्पान् ।
मणिरतन क्षिपन्ति केचि तस्मिं अपरि क्षिपन्ति च चूर्ण चन्दनस्य ॥
अपरिमित भवन्ति अच्छरीया अतुलिय येन च शक्तु कीर्त्तनाय ।
पुरवर प्रविशन्ति नायकस्मिं बहुजन कोटि स्थिहितु बुद्धज्ञाने ॥
अवृह अतपाश्च दृष्टसत्वाः सदृश सुदर्शन ये च अन्य देवाः ।
तथ पुनरकनिष्ठ वीतरागा उपगत सर्व्वि नरेन्द्रदर्शनाय ॥
तथ शुभमरुतात्र अप्रमेया अपरिमितशुभा उदग्रचित्ताः ।
शुभकृत्स्न नियुताश्च अप्रमेया उपगतु यस्मिन् नायकम्महर्षीं ॥
अपरिमित तथाप्रमाण आभा तथ पुन देव परित्तआभ ये च ।
बहुनियुत आभास्वराण तस्मि सुपगतु पश्यितु तेऽपि लोकनाथं ॥
बहव शतसहस्रपार्षदाद्यास्तथ पुन ब्रह्मपुरोहिताः प्रसन्नाः ।
बहुशत पुन ब्रह्मकायिकानामुपगतु नायकदर्शनाय सर्व्वे ॥
तथ पुन परिनिर्म्मितापि देवास्तथ निर्म्माणरती च शुद्धसत्वाः ।
प्रमुदित तुषिताथ यामदेवाः उपगत सर्व्वि नमस्यमान बुद्धं ॥

त्रिदश अपि च शक्रदेवराजा अप्सर कोटिशतैः सहागतोऽत्र ।
एकुमवर्ष संप्रवर्षमाणो उपगतु बुद्ध मुनीन्द्रदर्शनाय ॥
चतुरि चतुर्द्दिशासु लोकपाला वैश्रवणो धृतराष्ट्र नागराजा ।
विरुधक विरुपाक्ष हृष्टचित्ता उपगत सर्व्वि नरेन्द्र ते स्तुवन्तः ॥
इति चितिवलवस्तु यक्षराजा परिवृतु यक्षशतेहि प्रेमजातः ।
गगणतलि स्थिहित्व हृष्टचित्तः क्षिपति अनेकविचित्रपुष्पवर्षं ॥
अपरि पुनरनन्तमालधारी विविधविचित्र गृहीत्व माल्यगन्धान् ।
सर्व्वि सपरिवार हृष्टचित्ताः पुरुषवरस्य करोन्ति तत्र पूजाम् ॥
बहव शतकरोटपाणि यक्षा अपि च अभूषिय तेषु यक्षकन्याः ।
सुवाद्युन सुमनोज्ञ यक्षवाद्यैः सूर्य्यं शक्रेहि करोन्ति तत्र पूजा ॥
लभित मधुरगीतवादि तस्मिन् सकुशलैस्सह किन्नरीसहस्रैः ।
द्रुम उपगतु गन्धमादनातो जिनवर पूजन किन्नराण राजा ॥
सस्वस च त्रिवेमचित्रि राहु दानव कल्पसहस्रपारिवाराः ।
असुरगण महर्षिकाश्च अन्ये उपगत ते रतनानि वर्षमाणाः ॥
शतनियुत अनन्तराक्षसानां राक्षसकोटिशतैरुपास्यमानः ।
पृथु विविधविचित्रमुक्तपुष्पान् पुरुषवरस्य क्षिपन्ति गौरवेण ॥
उपगत गिरिवल्गुकौच नागराजो महिपरिवारु तथागतस्य मूलं ।
वर विविध गृहीत्व रत्नपुष्पान् प्रणिपतितो सुगतस्य पादुयुग्मे ॥
पद्म तथ महापद्म नागराजा तथ पुन वासुकि नन्तभोगकश्च ।
उपगत वृषभिस्य ते सकास प्रणिपतिसाः सुगतस्य गौरवेण ॥
उपगतु मणिनागु नागराजा प्रीतमना वृषभिस्य पादमूलं ।
वरसुरभि गृहीत्व नागपुष्पान् पुरतु स्थितः सुगतस्य नातिदूरे ॥
तथपि च अनवतप्त नागराजा परमसुशिक्षित तस्य नागकन्या ।
तूर्य्यं शतसहस्र नादयन्तो उपगत पूजन तत्र लोकनाथम् ॥
पञ्चशत अनवतप्तपुत्रा विपुल अनन्तस ज्ञान प्रार्थयन्तः ।
स्वजनपरिवृता उदग्र भूत्वा उपगत पूजयितुं स्वयं स्वयंभूः ॥
तथपि च अपलाल नागराजा पुरुषवरस्य कृताञ्जलिः प्रणम्य ।
वररुचिर गृहीत्व नागपुष्पान् स्थित गगणे मुनिराज सत्तरोक्तः ॥
तथपि च शुचिलिन्दु नागराजा प्रीतमनाः परितुष्ट हृष्टचित्तः ।
वररुचिर गृहीत्व नागराजा विविधरतनमोक्तिकं गृहीत्वा ॥
उपगमि नाथको किरन्तु तत्र तथपि च कालियकोऽपि नागराजा ।
उपगतु मूल तथागतस्य हृष्टचित्तः ... ... ... ... ... ... ... ॥
वररुचिरगृहीत्व रत्नदामां पुरुषवरस्य करित्व पूजश्रेष्ठाम् ॥





सोऽपि परमगौरवं जनित्वा मनुस्मरमाणगुणां तथागतस्य ।
स्वजनपरिवृतस्स नागसंघो बहुविध भाषति वर्ण नायकस्य ॥
नन्दु तथ उपनन्दूपानन्दु नागराजा तथ पुन तक्षकु कृष्णगौतमौ च ।
उपगतु जिन ते नमस्यमानाः प्रणिपतिताः सुगतस्य पादयोः हि ॥
उपगतु एलपत्र नागराजा परिवृतु नागशतेहि रोचमानः ।
मुनिवर जिन काश्यपः समन्तो स्वक उपपत्ति अपश्मि अक्षयेषु ॥
अहो अहुपरिमाणि कांक्षप्रासा मयि परिछिन्न परिन्तुमेलपत्रं ।
सो अहु उपगतु अक्षयेस्मिन्न सुकरु धर्म्मि विजानतुं जिनस्य ॥
क्षिप्र अहु जहित्व नागयोनिं परमजुगुप्सित मेतु जन्तुकायम् ।
धर्म्मि अहु निज निशीतिभावं पुरुषवेश्यं यो ज्ञातु बोधिमण्डे ॥
सागरु अहु राजचक्रवर्त्तौ परिवृतु नाग त्रियोनिकोटिसंघैः ।
वरुणमनस्वि गृहीत्व रत्नहारमुपगत तेषु भवन्तु दर्शनाय ॥
सन्ति बहुसहस्र नागराजा अपि च मनस्वय सागरो भुजगेन्द्राः ।
वररुचिर गृहीत्व नाग पुष्पान् उपगतु ते सुगतस्य पूजनाय ॥
छिफसिल जिनस्य तत्र योग गगणस्थितेन गृहीत्व तस्मि काले ।
राजगृह सकिन्यिलोऽपि यक्षः पुरतु स्थितः सुगतस्य गौरवेण ॥
अतगवति समग्रराजधानी शून्य अभूषित तत्र कश्चि यक्षः ।
सर्व्वक्रिय करित्व तत्र अन्यं उपगत पश्यितु सर्व्वलोकनाथं ॥
तथपि च खरकर्णु सूचिरोमा अठवकस्तथ यक्ष मेषकश्च ।
हैमवतु शतगिरिश्च यक्षो उपगतु गर्दभको जिनं स्वयंभू ॥
इन्द्रकेतु विकटाख्य सुरूपाः वक्तुलु पाञ्चिकु शाकुप्रबन्धो ।
एते परपि च यक्षेन्द्रसहस्रा उपगतु धूपघटा विगृह्य ॥
विकृत बहुवु संस्थितात्मभावा विगडितआभरणा अनेकरूपाः ।
बहव शतसहस्र तस्मि काले उपगत तत्र गृहीत्व यक्ष पुष्पान् ॥
गौतमु गभस्ति बृहस्पति जह्नु काश्यव कौशिक मरकण्डोऽपि ।
विश्वामित्र पराशरु गर्गा उपगन्तु सर्व्वि नमस्यमान बुद्धं ।
तथपि च नारद तुष्ट उदग्रा व्यास रौषि च अङ्गिरसा च ।
कुत्स वशिष्ठु मनु भृगु वत्सो उपगत तेऽपि च वन्दितु बुद्धं ॥
जामणि वामणि वैशंपायन जमदग्नीपि च वल्मीकु ऋषिवरु ।
दुर्व्वासोऽथच च्यमनु अनेश्वरुपगतु पुरुवरु नायकु द्रष्टुं ॥
दृष्ट रिषिन ऋषयस्तदपीता वन्दिषु चरणवरा मुनिराजो ।
स्तुत्य भिवन्द्य च लोकप्रदीपं प्राञ्जयः पुरतः स्थितु वीरे ॥
ऋषिगण्य सर्व्विय केचिद्द लोके उपगता पश्यितु तेऽपि नरेन्द्रं ।

हृष्ट च पूज करित्व सदाराः प्राञ्जलयः पुरतस्तु विस्थुः ॥
जलनिधि निवशन्ति येषु पश्य उपगत ब्राह्मणवेष निर्म्मिणित्वा ।
मुकुटधर विचित्रदर्शनीयाः गगणस्थिता सुगतन्नमस्यमानाः ॥
नगरपतय केचि जम्बूद्वीपे वनविवरेषु तत्र देवताश्च ।
सर्व्वि नगरदेवताः समग्राः उपगत पूज करोति नायकस्य ॥
उपगत वनदेवता अनन्तास्तथपि च सर्व्विय शैलदेवताश्च ।
तथपि च नदीदेवताः समग्राः उपगत पूज करोति नायकस्य ॥
अटविय मरुदेवताः समग्राः गिरिशिखलेषुय देवताः समग्राः ।
उत्ससरतडागदेवताश्च उपगत सागरदेवताश्च बुद्धं ॥
देव असुर नाग यक्षसंघा गरुडमहोरगकिन्नराः कुम्भाण्डाः ।
तथपि च बहुप्रेतप्रेतनाम्नो पुरुषवरस्य करोन्ति चित्रिकारं ॥
तेऽपि जिनवरैक नित्यपूजान्नगरवरं प्रविशन्ति नायकस्मिं ।
देवासुरनागयक्षराजा सततमतृप्त भवन्ति दर्शनेन ॥
यथ पुरिम भवेषु लोकनाथः पुरिम जिनेषु अकार्षि पूजश्रेष्ठां ।
पुण्यफलविपाक एवरूपि न च जन तृप्त नरेन्द्र पश्यमानः ॥
मेरु तथ सुमेरु चक्रवाडा हिमगिरि तथ गन्धमादनश्च ।
अवरशन ते जिनस्य भोन्ति आश्चर्य्यं यदा जिनमस्थि बुद्धक्षेत्रे ॥
ये च इह समुद्रबुद्धक्षेत्रे तेऽपि महिय समास्तदा भवन्ति ।
सर्व्वि मिमु समन्त बुद्धक्षेत्रे समु भवति कुसुमेहि संप्रकीर्णाम् ॥
रश्मिशतसहस्र अप्रमेया अवसरिया जनलेहि धर्म्मराजा ।
सर्व्वि निरभवन्ति च सर्व्वि बुद्धज्ञाने ... ... ... ... ... ॥
बहु इमि सुगतस्य प्रातिहार्य्या न सुकरु चक्रत कल्पकोटियेभिः ।
पुरवरु प्रविशन्ति नायकस्मिं प्रमुदितु सर्व्वि जना जिनप्रवेशे ॥
इमु गुण सुगतस्य अप्रमेया नरवृषभ यस्य गुणाग्रपारगस्य ।
सर्व्वगुणाविशेषे पारगस्य शिरसि नमस्यथ बुद्धपुण्यक्षेत्रम् ॥

पुरप्रवेशपरिवर्त्तो नाम दशमः ॥

---

# एकादशपरिवर्त्तः ।

अथ खलु भगवांश्चन्द्रप्रभकुमारभूतस्य निवेशनरथ्यामवग्राहयमानश्चन्द्रप्रभस्य कुमारभूतस्य निवेशनं प्रविष्टोऽभूत् । प्रविश्य च न्यषीदत । प्रज्ञप्त एवासने यथार्हैश्चासनैर्बोधिसत्वसंघः भिक्षुसंघश्च निषण्णोऽभूत् । अथ खलु चन्द्रप्रभकुमारभूतो भगवन्तं बोधिसत्वसंघं भिक्षुसंघञ्च निषण्णं विदित्वा महति सहार्घपाद्यानुपूर्व्वान् कृत्वा स्वयमेव शतरसेन





भोजनीयेन प्रणीतेन प्रभूतेन खादनीयभोजनीयेन लेह्येन चोष्येन पेयेन भगवन्तं सन्तर्प्य सम्प्रचार्य्य भगवन्तं भुक्तवन्तमपनीय धौत्रपात्रपाणी विदित्वा दिव्येन नवनवतिकोटिशतसहस्रमूल्येन दुष्ययुग्मेन भगवन्तमभिच्छादयामास ॥ तेषाञ्च बोधिसत्वानां भिक्षुसंघस्य च प्रत्येकं प्रत्येकं तृचीवलमाददाति । दत्वा च उत्थायासनादेकांसमुत्तरासंगं कृत्वा दिव्यैर्मान्दारवैः भगवन्तमभ्यर्च्याभिवन्द्य येन भगवांस्तेनाञ्जलिं प्रणम्य भगवन्तं सारूप्याभिर्गाथाभिरभ्यष्टावीत् ।

अविग्रहा अनुत्पन्ना अनिरुद्धा अचिन्तिया ।
रूपलक्षणसम्पन्ना नमस्ते गुणसागराः ॥
प्रज्ञया जनिता वीरा उपाय परिविक्रमा ।
आकाशचेतिया बुद्धा नमस्ते क्षान्तिपारगाः ॥
स्मृति उपस्थाय विहारगोचरा प्रमोद्य प्रीतिनयना तथागताः ।
समाधिपानावरध्यानभोजना नमोऽस्तु ते शून्यतरं न्यवस्थिता ॥
रूपकायञ्च देशेसि करुणावशिता जिनाः ।
येन सत्वानुकम्पाय विवभुंज प्रदृश्यते ॥
अहो अचिन्तिया बुद्धा सर्वलोकविनायका ।
यं त्वाभिपूज्य लोकोऽयं याति निर्वाणमुत्तमम् ॥
एवं स्तवित्वा असमसमेकनाथां
गिरं प्रभाषि मुदितमनाः कुमारः ।
भोजित्व बुद्धम् अतुलिय चिन्त्यकायं
बुद्धो भवेयं यथ तुम देवदेव इति ॥

अथ खलु चन्द्रप्रभः कुमारभूतो भगवंन्तं दिव्येन शतरसेन भोजनेन सन्तर्पयित्वा दिव्येन चानर्घेन वस्त्रयुगेनाच्छाद्य दिव्यैश्च मान्दारवैः पुष्पैर्भगवन्तमभ्यर्च्याभिवन्द्य च सारूप्याभिश्च गाथाभिरभिष्टुत्य एकांसमुत्तरासङ्गं कृत्वा दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य भगवतः पादौ शिरसा वन्दित्वा येन भगवांस्तेनाञ्जलिं प्रणम्य भगवन्तं गाथाभिर्गीतेन मनसा प्रश्नं पृच्छति स्म ।

कथञ्चरन्तो विदु बोधिसत्वो स्वभावधर्म्माण सदा प्रजानते ।
कथं क्रिया भो चरते विचक्षणः क्रियाभोतारु वदाहि नायकाः ॥
कथञ्च जातिस्मरु भोन्ति नायके नचापि गर्भा उपपद्यते कथम् ।
कथं परिवारु भवेद्य भेद्य प्रतिभानु भोन्तिह कथं अनन्तकः ॥
सर्वेषु सत्वान चरिं प्रजानसे सर्वेषु धर्म्मेषु तज्ज्ञानु वर्त्तते ।
अनाभिभूतद्विपदान मुत्तमाः पृच्छामि प्रश्नं मम व्याकरोहि ॥
स्वभावधर्म्माण सभावु जानसे अनाभिलप्याक्षिन संप्रभाषसे ।
सिंहेन चानिर्ज्जितसर्वलोको तथैव बुद्धेनिहि अन्यतीर्थिकाः ॥
सर्वेष सत्वान चरिं प्रजानसे सर्वेषु धर्म्मेषु तु ज्ञान वर्त्तसे ।

अशुद्धज्ञानी परिशुद्धिगोचरा तथा करोध मम धर्म्मस्वामी ॥
अतीतु जानाषि तथा अनागतं यतो हि ईहा वर्त्तति प्रत्युत्पन्नम् ।
त्रियध्व ज्ञानन्ति असन्तु वर्त्तते तेनाहू पृच्छामि इ शाक्यसिंहम् ॥
त्रियध्वयुक्तान जिनान धर्म्मतां तान्धर्म्मतां जानषि धर्म्मराजा ।
धर्म्मस्वभावकुशलः स्वयं भुन्ते नाहु पृच्छामिह ज्ञानसागरम् ॥
यत्किञ्चित् धर्म्मसंस्खलितन्न तेऽस्ति ततोऽतिचित्तं निखिलं प्रहीणम् ।
प्रहीणग्रन्थाखिलमोहसाठका देशेहि मे बोधिचरिन्नरेन्द्रः ॥
यल्लक्षणां धर्म्म मम प्रकाशय यल्लक्षणां धर्म्ममहं विदित्वा ।
तल्लक्षणां बोधिचरिष्य चारिकां ... ... ... ... ॥
विलक्षणां सत्वचरीननन्ता कथस्वरन्तश्च विमोक्षरन्ति ।
चरिप्रवेशं मम देशय स्वयं श्रुत्व सत्वान चरिं प्रजानयम् ॥
विलक्षणां धर्म्मस्वभावलक्षणां स्वभावशून्यं प्रकृतीविशुद्धम् ।
प्रत्यक्षशान्तिं कथ बोधिसत्वां प्रकाशयस्व मम बुद्धनेत्रीम् ॥
सर्वेषु धर्म्मेषु इह पारमिङ्गता सर्वे निर्देशपदेषु शिक्षिताः ।
निःसंशयी संशयुकांक्षच्छेदका प्रकाशयामी मम बुद्धबोधिम् ॥

अथ खलु भगवान् चन्द्रप्रभकुमारभूतस्य चेतसैव चेतःपरिवितर्कमाज्ञाय चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म । एकधर्म्मेण कुमार समन्वागतो बोधिसत्वो महासत्वः एतान् गुणान् प्रतिलभते । क्षिप्रञ्चानुत्तरां सम्यक्सम्बोधिमभिसंबोत्स्यते । कथमनेकधर्म्मेण इह कुमार बोधिसत्वो महासत्वः सर्वधर्म्माणां स्वभावो नास्ति कथञ्च कुमार बोधिसत्वो महासत्वः सर्वधर्म्माणां स्वभावं जानाति । इह कुमार बोधिसत्वो महासत्वः सर्वधर्म्माश्शमका नामपगता प्रजानाति । घोषाय पगता वाग्भ्युपगतां नक्षरापगता सुपादां पगतान्निरोधापगता हेतुलक्षणाप्रत्ययलक्षणं विवेकलक्षणं निमित्तानिमित्तपगतान चिन्ता चित्तापगता मनो इयं कुमार पगता धर्म्मेणोपगतः सर्वधर्म्मान् प्रजानाति ॥ अथ खलु भगवांस्तस्यां वेलाया-मिमां गाथां अभाषत ॥

एकनिर्देशधर्म्माणां सर्वधर्म्मा अलक्षणां ।
देशिता च न प्रश्नेन यथाभूतां प्रजानता ॥
यत्र तं धर्म्मनिर्देशं बोधिसत्वः प्रजानति ।
न तस्य भोति निष्ठानं सूत्रकोट्याः प्रभाषत ॥
अधिष्ठिता नायकेभि भूतकोटि प्रजानति ।
प्रजानाति च तां कोटिन्न चात्रो किञ्चि भाषितम् ॥
एकेन सर्व्वं जानाति सर्व्वमेकेन पश्यति ।
कियद्बहुस्मि भाषित्वा न तस्योत्पद्यते मदः ॥
तथास्य चित्तं निध्याप्तं सर्व्वधर्म्मा अनात्मकाः ।





शिक्षितो नाम निर्द्देशं भूतं वाचम्प्रभाषते ॥
शृणोति घोषं यत्किञ्चित् पूर्व्वान्तं तस्य जानति ।
ज्ञात्वा घोषस्य पूर्व्वान्तं घोषेण क्रियते तमः ॥
यथा घोषस्य पूर्व्वान्तमेवं धर्म्माण लक्षणम् ।
एवं धर्म्म प्रजानन्तो तमस्तेषूपपद्यते ॥
अजातिः सर्व्वधर्म्माणां अनुत्पत्तिः प्रजानति ।
प्रजातजातिनिर्द्देशं भवेज्जातिस्मरस्सदा ॥
यदा जातिस्मरो भोति तदा नावरजिक्रियां ।
क्रियामोत्तरमानस्य परिवारो न विद्यते ॥
य एवं शून्यकान्धर्म्मान् बोधिसत्वः प्रजानति ।
न तस्य किञ्चिदज्ञातमेषा कोटिनं किञ्चना ॥
अकिञ्चनायाः कोट्या हि किञ्चि वालैर्विकल्पितं ।
येन ते कल्पकोटियो संसरन्ति पुनः पुनः ॥
स चेत्ते कल्पजानीयः यथा जानाति नायकः ।
न तेषां दुःख जायेत नापि गच्छेय दुर्गतिं ॥
एवं पृथग्गुणाः सर्व्वे अजानन्त इमं नयं ।
क्षिपन्ति ईदृशधर्म्मा यत्र दुःखं निरुध्यते ॥
अलब्धिः सर्व्वधर्म्माणां धर्म्मसञ्चय वर्त्तते ।
सा एवं जातिका संज्ञा संज्ञामेवं विजानथ ॥
विजानना च संज्ञा च चोभे ते तद्विकल्पितं ।
अकल्पिते बुद्धधर्म्मे नात्र मुह्यन्ति पण्डिताः ॥
पण्डितानामियं भूमिर्वालानां नात्र गोचरः ।
गोचरो बुद्धपुत्राणां शून्यधर्म्मात्मनाविला ॥
बोधिसत्वानामियं भूमिर्बुद्धपुत्रचरी इयं ।
बुद्धधर्म्माण लङ्कारो देशिता शान्तशून्यता ॥
यदा च बोधिसत्वानां प्रहीणा भोति वासना ।
न ते हीयन्ति रूपेहि बुद्धगोत्रस्मि ता स्थिता ॥
अस्थानां सर्व्वधर्म्माणां स्थानमेषां न विद्यते ।
यत्र च स्थान जानाति बोधिस्तस्य न दुर्लभा ॥
दानं शीलं श्रुतं क्षान्तिं सेवित्वा मित्रभद्रकां ।
इमाः क्रिया विजानन्तो क्षिप्रं बोधिञ्च बुध्यति ॥
देवाथ नागा सदसत् करोति गन्धर्व्वयक्षा असुरा महोरगाः ।
सर्व्वे च राजान सुपर्णकिन्नराः निशाचराश्चास्य करोन्ति पूजाम् ॥

यशोऽस्य भाषन्ति च बुद्धकोटियो बहुकल्पकोट्यापि अधिष्ठिहन्ता ।
धर्म्मप्रकाशेन्तिय भोति वर्णा न शक्नु पर्य्यन्त क्षेपेतुमस्य ।
यः शून्यतां जानति बोधिसत्वः करोति सार्थं बहुप्राणिकोटिनां ॥
देशेति धर्म्मं पर्य्यायशून्यतां शूत्वास्य प्रेमञ्जनयन्ति गौरवं ।
ज्ञानञ्च तेषां विपुलं प्रवर्त्तते येनेति पश्यन्ति नरोत्तमान् जिनान् ॥
क्षेत्रे च पश्यन्ति वियूहशोभनं धर्म्मञ्च देशेन्ति त लोकनाथः ।
मायोपमान् जानथ सर्व्वधर्म्मान् यथान्तरीक्षं प्रकृती च शून्यं ॥
प्रकृतिस्मि सो जानति तेषु तादृशी एवं चरन्तो न कहिञ्चि सर्ज्जति ।
ज्ञानेन संगेन करोन्ति तर्कं लोके चरन्तो वरबोधिचारिकां ॥
ज्ञानेन ते वीक्षिय सर्व्वधर्म्मा प्रेष्वन्ति ते निर्म्मित अन्यक्षेत्रां ।
ते बुद्धकृत्यं करियान निर्म्मितां प्रकृतीय गच्छन्ति यथैव धर्म्मतां ॥
यथाभिप्रायच लभन्ति तेर्थं ये बोधिसत्वस्मि नराः प्रतिष्ठिताः ।
स भोति बुद्धान सदा कृतज्ञयोः बुद्धवंशस्यस्थितीय युज्यते ॥
विरोचमानेन समुच्छ्रयेन द्वात्रिंशकायस्य भवन्ति लक्षणां ।
अन्योन्येन नन्ता बहु आतुसंघा श्रेष्ठः स बोधौ चरमान लप्स्यते ॥
महाबलो भोति सदा प्रकम्पियो राजान तस्यो न सहन्ति तेजः ।
प्रासादिको भोति महाभिशक्रः पुण्येन तेजेन सिरीय चोद्गताः ॥
देवापि नो तस्य सहन्ति तेजो यो बुद्धधर्म्मेषु च नेय्य पण्डितः ।
मित्रं स भोति सद सर्व्वप्राणिनां यो बोधिचित्तस्मि दृढप्रतिष्ठितः ॥
न चान्धकारोऽस्य कदाचि भोति प्रकाशयन्तस्मि स बुद्धबोधिं ।
अपगतगिरिवाम्पुथा अनाभिलप्या यथ गगनं तथ ताः स्वभावधर्म्माः ।
इम गति परमा विजानमानो तथतु भवति प्रतिभानु अक्षय ॥
सूत्रशतसहस्र भाष्यमाणः सूक्ष्म प्रजानति पूर्व्विकां सकोटीं ।
स विदु भवति असङ्गवाक्यः इमु सुखधर्म्मस्वभाव जानमानः ॥
नयशतकुशलस्य नित्य भोती बहुविध घोषनिरुक्तिकोविदश्च ।
कर्म्मफलविरक्तिनिश्चिताश्चो भोन्ति विशिष्टविशेष एवरूपाः ॥
अविकल भाववेगधारि भोगी दशबल आत्मच्च पण्डितो महात्मा ।
सद स्मृति परिशुद्ध तस्य भोति सुसुख मधर्म्मस्व भाव जानमानः ।
न शृणति असना जातु शब्दान् शृणति प्रणीत मनायु नित्यशब्दान् ॥
सद भवति मनोज्ञ तस्य वाचा सुसुखमधर्म्मस्वभाव जानमाने ।
स्मृति मति गति प्रज्ञ वल्गु भोगी तथपि च चित्तमनाविलं प्रसन्नम् ॥
सूत्रशत प्रभाषते अनेकान् सुसुखमधर्म्मस्वभाव जानमानः ।
अक्षरपदभेदकोविदस्चो नुत बहु जानति नेक अन्यमन्ये ॥





अपि कुशल भोति व्यञ्जनोचो इम गुणधर्म्मस्वभाव जानमाने ।
देवमनुजनागराक्षसानामसुरमहोरगकिन्नराण नित्यं ॥
ते सद प्रियामनाय भोती सुसुखमधर्म्मस्वभाव जानमाने ।
सूत्रगणपिशाचराक्षसाश्चो परमसुदारुण च मासभक्षाः ॥
तस्युभय न जातु सञ्जुनेति सुसुखमधर्म्मस्वभाव जानमाने ।

शीला ।

ये जीविकार्थेन करोन्ति पापं अधिमुक्तिसम्पन्न य बोधिसत्वाः ॥
अनुमोदमी तेषु य किञ्चि पुण्यं अनुमोदमी येषु प्रसादबुद्धेः ।
धर्म्मप्रसादोऽस्ति तथैव संघ अनुमोदमी ये सुगतस्य पूजां ॥
कुर्व्वन्ति बोधिं प्रतिकांक्षमाणाः ... ... ... ... ... ... ।
अनुमोदमी येहि अनुत्तरायामुत्पादितं चित्तवराग्रबोधये ।
सत्वान अर्थाय महामतीनां सम्बोधि वंशस्य च स्थित्यहेतोः ॥
अनुमोदमी ये धनधान्यरता त्यजन्ति अन्तःपुर धीतपुत्रान् ।
राज्यञ्च स्फीतन्तत आत्मनात्मं करणाय आवेशितबोधिसत्वाः ॥
अनुमोदमी ये त्यजि आत्मभावं सत्वान अर्थाय प्रहृष्टचित्ताः ।
प्रज्ञाय परिभावितदान्तकाया उपायकौशल्यसुशिक्षशिक्षिताः ॥
अनुमोदमी येषु न आत्मदृष्टिर्न भावदृष्टिर्न च जीवदृष्टिः ।
अनुमोदमी येषु न पापदृष्टिः ये शून्यतां श्रुत्व जनेन्ति तुष्टिं ॥
अनुमोदमी ये सुगतस्य शासने लभन्ति प्रव्रज्यय सम्पदञ्च ।
अल्पेच्छसन्तुष्ट वने वसन्ति प्रशान्तचारित्र त्रयध्यानगोचराः ॥
अनुमोदमी एकक ये द्वितीया वने वसन्ति सद खड्गभूताः ।
आजीवशुद्धाः सद अल्पकृत्या ये ज्ञानहेतोर्न करोति कूहनाम् ॥
अनुमोदमी येषु न संस्तवोऽस्ति न चापि ईर्ष्या न फलेषु तृष्णा ।
उत्त्रस्तत्रैधातुक नित्यलम्भा अनोपलिप्ता विचरन्ति लोके ॥
अनुमोदमी येषु प्रपञ्च नास्ति निर्विर्णसर्व्वानुभवोपपत्तिः ।
अविगृहीता उपशान्तचित्ता न दुर्लभस्तेषु समाधिरेषः ॥
विपुलकथं शृणित्व पण्डितानां विपुल प्रजानति रोमहर्ष तेषां ।
विपुल तद जनन्ति बुद्धप्रेमं विपुल अचिन्तियु तेषु भोति अर्थः ॥
पुण्यबलेन सकृतेषु वक्तुं बहुमपि कल्पसहस्र भाषमाणैः ।
अपरिमित अनन्त अप्रमेया इमु सुगतान धनेत्व धर्म्मराजं ॥
सर्व्वि जिन अतीत पूजितास्ते अपरिमितायु अनागताश्च बुद्धाः ।
दशसु दिशासु प्रस्थिताश्च बुद्धाः इम वरशान्तसमाधि धारयित्वा ॥
यथ तरु इह कश्चि पुण्यकामो दशबल कारुणिकानुपस्थिहेर्य्या ।

अपरिमित अनन्तकल्पकोटीरपरिमितं च जनेत्व तेषु प्रेमं ॥
द्वितीयेनतु भवेत पुण्यकामा ईतु परमार्थनयातु गाथमेकां ।
घोरयि चरमि कालि वर्त्तमाने परमकुपुण्यफलान्न भोति तस्य ॥
परम इयं विशिष्ट बुद्धपूजा चरम किदा कारुणिका वर्त्तमाने ।
चतुपदमितु गाथमेक श्रुत्वा धारयि पूजित तेन सर्वबुद्धाः ॥
परम सद सुलब्ध तेहि लाभा परम सुभक्त सदाचराषु पिण्डः ।
परम दशबलस्य ज्येष्ठपुत्रा बहुजिन पूजित तेहि दीर्घरात्रं ॥
अहमपि इह गृध्रकूटो तथ मय व्याकृत तेऽपि बुद्धज्ञाने ।
अपि च मह परीत्तमैत्रकस्या पुनरपि व्याकरणाय तस्मि काले ॥
तथ पुनरमितायुरेष तत्रो भाषति बुद्ध अनेक आनुसंसा ।
सर्व्वि इमि सुखावती विशिष्टो अभिरति गन्ध अक्षोभ्य पश्चि बुद्धम् ॥
कल्पशतसहस्र अप्रमेया न च विनिपातभयं कदाचि भोती ।
इमि वर चरमाण बोधिचर्य्यां अनुभवती स हि नित्यु सौमनस्यः ॥
तस्य इम विशिष्ट एव रूपा य इम प्रकाशित श्रेष्ठ आनुशंसां ।
प्रतिपदमनुशिक्षमान मह्यं पश्चिमि कालि धरेथ सूत्रराजम् ॥

सूत्रधारपरिवर्त्तो नाम एकादशमः ॥

---

## द्वादशपरिवर्त्तः ।

तत्र कुमार बोधिसत्वो महासत्वः सर्व्वधर्म्माणां स्वभावं प्रजानाति । तस्य मे एवंरूपा गुणानुसंसा भवन्ति स तथागतानां भूतगुणवर्णं भावन्तेन च तथागतानभ्याख्याति । असमता सद्भूतेन तत्कस्य हेतोः । यया धर्म्मतया तथागतः प्रभाषते तां धर्म्मतां यथा भूतः प्रजानाति । तत्कस्य हेतोः । अनन्ता हि कुमार बुद्धगुणाः । अचिन्त्याश्चिन्तापगताः । तेन शक्यं चिन्तयितुं वा ममा वा तत्कस्य हेतोः । चित्तं हि कुमार निःस्वभावमनुष्यमनिदर्शनं । इति हि कुमार यत्स्वभावं चित्तं तत्स्वभावा बुद्धगुणाः तत्स्वभावस्तथागतः तत्स्वभावाः सर्व्वधर्म्माः यथा कुमार बोधिसत्वो,महासत्वः एवं सर्व्वधर्म्माः गुणाः स्वभावमेकार्थनिर्द्देशं यथाभूतं प्रजानाति । अयं कुमार उच्यते बोधिसत्वो महासत्वो निध्यप्तिमानसः निस्सरणकुशलः त्रैधातुकनिःसरणः यथाभूतं प्रजानाति यथावदेशी अवितथभाषी अनन्यभाषी यथावादी तथाकारी अनभिनिविष्टत्रैधातुकसमतिक्रान्तः कामभूमिं रूपभूमिं साहृप्यभूमिं क्लेशभूमिं वासभूमिं गोत्रभूमिं घोषभूमिमक्षरधर्म्मनयकुशलः अक्षयविभावितज्ञानः अनभिलाप्यधर्म्मकोविदः अक्षरज्ञः अक्षरकुशलः अक्षरपदप्रभेदज्ञानकुशलः सर्व्वधर्म्मप्रभेद





विज्ञानज्ञानकुशलः सर्व्वधर्म्मव्यवस्थानकुशलः । निश्चितया बुद्धसमन्वागतोऽनाभिभूतमारैः पापीयद्भिः मानकायिकाभिश्च देवताभिः अस्मिन् खलु पुनर्धर्म्मपर्य्याये भाष्यमाणे अष्टानवतेः नियुतानां देवमानुषिकायाः प्रजायाः पूर्व्वकर्म्मकृतायाः कोटीशतसहस्रपरिवर्त्तीया धारण्याः अनावरणायाश्च धर्म्मविपश्यनायाः क्षान्तेः प्रतिलम्भोऽभूत् । ते च सर्व्वे भगवता व्याकृता अष्टचत्वालिंशता कल्पेनासंख्येयशतसहस्रैरनुत्तरां सम्यक्सम्बोधिमभिसंबोत्स्यन्ते । सर्व्वे च अन्योन्यनामानः एकायुष्प्रमाणा अन्योन्येषु बुद्धक्षेत्रेष्वनुत्तरां सम्यक्सम्बोधिमभिसम्बोत्स्यन्ते । सर्व्वे चान्योन्यनामानः एकायुष्प्रमाणाः अन्योन्येषु बुद्धक्षेत्रेष्वनुत्तरां सम्यक्सम्बोधिमभिसम्बोत्स्यन्ते । तत्रेदमुच्यते ।

या बोधिसत्वमभि मां प्रार्थेति अनुत्तरां नाम बोधिं ।
अर्थेषु धर्म्मकुशलो चरति स धर्म्मस्वभावस्तस्मिन् ॥
नाभूतं भवति वाचं बुद्धानां यादृशा गुणविशेषाः ।
स हि धर्म्मं तं जिनानां जानाति शूरो विगतकाङ्क्षः ॥
एकार्थं सर्व्वधर्म्माणां प्रजानाति च शून्यकान् ।
नानात्वं नास्ति तेषामेकार्थे शिक्षिते भवन्ति निष्कल्पाः ॥
निष्कल्पान नोपलम्भाश्च जानतीमतिमां क्षयि अक्षयेस्य ।
संज्ञा प्रहीण सर्व्वा निरवशेषाः न हि रूपतो दशबलान् पश्यति ॥
सो धर्म्मकाय नरसिंहं नोपलक्षयो हि तस्य प्रहीणाः सर्व्वे विपर्य्यासाः ।
धर्म्मं अचिन्त्य एते चिन्तापगतस्वभाव उपसन्ताः ॥
एवं प्रजानमानः पश्यति बुद्धान् द्विपदश्रेष्ठान् ।
अथ ज्ञानं वा आत्मसंज्ञा तथैव सर्व्वत्र प्रेषिता बुद्धिः ॥
सर्व्वे च तत्स्वभावा धर्म्मं विशुद्धागमसत्वाः ।
न हि जातु सा तस्यो निशरणत्वात्तु सर्व्वधर्म्माणां ॥
त्रैधातुके विमुक्तिः प्रणिधानेन विद्यतेऽस्य ।
यथा वदृसि भोन्ती अवितथवचने अन्यथाभानी ।
सर्व्वश्च तस्य वचनमु निश्चरति जिनानुभावेन ॥
अतिक्रान्तुककांक्षी स्पर्शिता विभावितं वस्तु भवेन सज्जषि ।
प्रपञ्च सर्व्वे सकलान भोन्ति ते अज्ञानन्त्वि भवेति वर्त्तते ॥
सर्व्वप्रपञ्चेभिरनोपलिप्ता दृष्टिप्रपञ्चाः सकलाः प्रहीणाः ।
सुभावितो मार्गु निकेतु नास्ति अनाभिहो अविरुद्ध केचित् ॥
निकेतु त्रैधातुक नास्ति तुभ्य ओघाश्च ग्रन्याश्च प्रहीण सर्व्वे ।
तृष्णालताबन्धन सर्व्वि छिन्ना प्रेमप्रहीणो भव सर्व्वि नास्ति ॥
स्वभावधर्म्माणमभाव जानसे अनाभिलप्या गिर संप्रभाषसे ।
सिंहेन वा क्रोष्टुकवीथि नाशिता ये ते विपर्य्यासस्थितान् अविद्वसु ॥

निधानश्रेष्ठं मयि लब्धमद्य धर्म्मस्विधानं सूत्रेण दर्शितं ।
प्रहीण सर्व्वा विनिपात दुर्गति काङ्क्षन्महास्मि भविष्य नायकः ॥
मूर्द्धस्मि प्राणि प्रतिष्ठापयित्वा सुवर्णवर्णरुचिरं प्रभास्वरं ।
अभिषिञ्च वा ये नरसहस्रं सदेवकां लोक स्तुयेत्व सात्विकम् ॥

स्मितव्याकरणपरिवर्त्तो नाम द्वादशमः ॥

---

# त्रयोदशपरिवर्त्तः ।

तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म । तस्मात्तर्हि कुमार बोधिसत्वेन महासत्वेन सर्व्वसत्वान् सर्व्वभय दुःखेभ्यो मोचयितुकामेनार्य्ये चानुत्तरे समाधिप्रीतिसुखे सत्वान् प्रतिष्ठापयितुकामेनायं सर्व्वधर्म्मस्वभावसमताविपञ्चितः समाधिराजः तेन श्रोतव्यः पर्य्यवाप्तव्यः धारयितव्यो वाचयितव्यः प्रवर्त्तयितव्य उपदेष्टव्यः सन्ध्यातव्यः अरणाभावनया भावयितव्यो वहुलीकर्त्तव्यः परेभ्यश्च विस्तरेण संप्रकाशयितव्यः । तत्कस्य हेतोः । सर्व्वापायातिक्रमको हि कुमारायं सर्व्वधर्म्मस्वभावसमताविपञ्चितः समाधिराजः सर्व्वव्याधिप्रमोचकश्च यथा च कुमार बोधिसत्वेन महासत्वेनायं सर्व्वधर्म्मस्वभावसमताविपञ्चितः समाधिराजः श्रुतो भवत्युद्गृहीतो भावितश्च तदायं कुमार बोधिसत्वो महासत्वः सर्व्वसत्वानां सर्व्वभवदुःखेभ्यो मोचयित्वा आर्य्ये चानुत्तरे समाधिप्रीतिसुखे सत्वान् प्रतिष्ठापयति । क्षिप्रं चेमं समाधिं प्रतिलभते क्षिप्रञ्चानुत्तरां सम्यक् संबोधिमभिसम्बुध्यते । अथ खलु भगवान् तस्यां वेलायां चन्द्रप्रभकुमारभूतस्य एकमेवार्थमुद्योत्य गाथाभिर्गीतेन इमं पूर्व्वयोगकथानिर्देशं संप्रकाशयतिस्म ।

स्मरामि पूर्व्वञ्चरमानुचारिकां सिंहध्वजस्य सुगतस्य शासने ।
अभूषि भिक्षू विदु धर्म्मभाणको नामेन सोच्यति ब्रह्मदत्तः ॥
अहञ्च आसी सतीराजपुत्रो आबोधिको वाढगिलान दुःखितः ।
महाञ्च सो आचरि अभूषि यो ब्रह्मदत्तस्तद धर्म्मभाणकः ॥
पञ्चो ममा वैद्यशता अनूनकाः व्याधिं चिकित्सन्ति उद्युक्तमानसाः ।
व्याधिं न शक्नोन्ति मम चिकित्सितुं सर्व्वे मम ज्ञातयः आसी दुःखिताः ॥
श्रुत्वा च गैलान्यु समद्यभिक्षुः गिलानपृच्छो मम अन्तिकागतः ।
कृपां जनेत्वा मम ब्रह्मदत्तो इमं समाधिं कुरु तत्र देशयी ॥
तस्मा ममा एतु समाधि श्रुत्वा उत्पन्नप्रीति अनिया निरामिषा ।
स्वभावधर्म्मान प्रजानमानो उच्छाषि व्याधी तहु तस्मि काले ॥
दीपङ्करः सो चरमानुचारिकां अभूषि भिक्षू विदु धर्म्मभाणकः ।
अहञ्च आसीनृमतिराजपुत्रो समाधिज्ञानेन हु व्याधिमोचितः ॥





तस्मात् कुमारा तुहु पश्चकाले अनुस्मरन्तो इमु पारिहाणिं ।
सद्देषि वाला तहू कुवाक्यं धारेन्तु वाचेन्तु इमं समाधिं ॥
भेष्यन्ति भिक्षु वहु यस्य काले लब्धाश्च दृष्टाश्च असंयताश्च ।
पायेच्छ व्योषित पात्रचीवरे प्रतिक्षिपिष्यन्ति इमं समाधिं ॥
ईर्ष्यालुकाद्भुतप्राकटेन्द्रियाः कुलेषु चाव्योषितलाभकामाः ।
प्रायोगिकेषु स्थवि नित्यसंश्रिताः प्रतिक्षिपिष्यन्ति इमं समाधिं ॥
हस्ताश्च पादास्तथ विद्यमाना हास्ये × × × च सदा प्रयुक्ताः ।
परस्परं कण्ठितश्लिष्यमाना ग्रामेषु चर्य्यापथ अभ्युपेष्यति ॥
अयुक्तयोगानिमि भोन्ति लक्षणाः परङ्कुमारीषु च नित्यव्योषिताः ।
रूपेण सन्तो ग्रथिता भवन्ति हिंसन्ति ग्रामान्निगमांश्च राष्ट्रान् ॥
ते खाद्यपेयेस्मि सदा प्रयुक्ताः नाट्येच गीतेच तथैव वादिते ॥
क्रयविक्रयेचोत्सव भोन्ति उत्सुकाः पानेषु चाव्योषित तेषु लज्जाः ।
लेखान पिष्यन्ति अयुक्तयोगाः शीलन्तथैर्य्यापथु छोरयित्वा ॥
मर्य्याद हिन्दित्व गृहीभि सार्द्धन्ते भिन्नवृत्ता वितथप्रतिष्ठिताः ।
ये कर्म्म बुद्धेहि सदा विवर्ज्जिताः तुलमानकूटे च सदा प्रयुक्ताः ॥
तत्कर्म्म कृत्वा न किलिष्ट पापकानपाय यास्यन्ति निहीनकर्म्माः ।
प्रभूचितं मणिहेमशंखं गृह्यांश्च ज्ञातींश्च विहाय प्रव्रजिते ॥
प्रव्रजित्व इह बुद्धमानसं पापानि कर्म्माणि समाचरन्ति ।
धनेच धान्येच तथा रसङ्गितो वेणुश्च ग्रावः सकटानि सज्जयी ॥
किमर्थं तेहि इम केशच्छोरिता शिक्षाय येषां प्रतिपत्ति नास्ति ।
मया च पूर्व्वे × × × चरित्वा सुदुष्करं कल्पसहस्र प्रकीर्णं ॥
अयञ्च मे शान्तसमाधिरेषितो यत्तेषु श्रुत्वा तद दाषु भेष्यति ।
चिरं मृषावादि अब्रह्मचारिणो अपायनिष्ठाः सद लाभकामाः ॥
ते ब्रह्मचारिण चरित्व तं गृहीत्वा दुःशील वक्ष्यन्ति न एष धर्म्मः ।
भेदाय स्थास्यन्तिच ते परस्परं अयुक्तिभिर्लाभ गवेषमाणाः ॥
अपायभूमिं शतसहस्रमेषु क्षान्तिवलं येषु तदा भविष्यति ।
अतो वहू ये कलहेस्मि उत्सुकाः प्रपञ्चकाहिन्ति जहित्व क्षान्ति ॥
वक्ष्यन्ति वाचाधंय बोधिसत्वाः सच्चपि चैषां व्रजि देशदेशे ।
अभूत शब्देन मदे समन्ता विपन्नशीलान कुतोऽस्ति बोधिः ॥
न मे श्रुतं नापि कदाचि दृष्ट मध्याशयो यस्य विशुद्ध नास्ति ।
इमेषु धर्म्मेषु वास्ति क्षान्ति प्रतिलप्स्यते बोधि क्षिपित्व धर्म्मान् ॥
भीताश्च त्रस्ताश्च गृहं त्यजन्ति ते प्रव्रजि गाढतरा भवन्ति ।
विशेषकामा विलयं व्रजन्ति च्छिपिलयानं पुरुषोत्तमानां ॥

निहीनप्रज्ञा गुणविहीना वच्यन्ति दोषं सद अग्रयाने ।
यस्मै च ते तच्छरणं प्रपन्नाः तत्रैव ते दोषशतान् वदन्ति ॥
अजीवका ये बहु प्रव्रजित्वा अनर्थिका सर्व्वं सुबुद्धबोधये ।
त आद्गृष्टिय स्थिहित्व वाला त्रस्ता भेष्यन्ति श्रुणित्व शून्यताम् ॥
विवाद कृत्वा तत अन्यमन्यं व्यापाददोषां सुखिलं जनित्वा ।
अन्यातु दत्वा च परस्परेण लप्स्यन्ति प्रामोद्य करित्व यायां ॥
ये शीलवन्तो गुणवन्तु भेष्यती मैत्रीविहारी सद क्षान्तिकोविदः ।
सुसंवृतो मार्द्दवसुरतश्च परिभुक्त सो भेष्यति तस्मि काले ॥
ध्याख्यो पुनो भेष्यति दुष्टचित्तः सुदारुणो रौदुति हीनकर्म्मा ।
अधर्म्मचारी कलहरतश्च स पूजितो भेष्यति तस्मि काले ॥
आरोचयामि प्रतिवेदयामि वो स चेत् कुमारा मम श्रद्ध गच्छथ ।
इमां स्मरित्वा सुगतानुशासनिं न जातु विश्वस्तु भवेथ तेषां ॥
ते वीतरागास्तथ तीव्रदोषास्ते तीव्रमोहाः सद मानमत्ताः ।
अदान्तकायाश्च अदान्तवाचो अदान्तचित्ताश्च अपापनिम्नाः ॥
अहश्व भाषेष्य गुणान वर्णं नचो गुणान् भित्तुसमाधिसेव्या ।
न घोषमात्रेणच बोधि लप्स्यते प्रतिपत्तिसाराण न बोधि दुर्लभा ॥

पूर्व्वयोगपरिवर्त्तोनाम त्रयोदशमः ॥

---

# चतुर्दशपरिवर्त्तः ।

अस्मिन् खलु पुनः पूर्व्वयोगकथापर्य्यवसाने वर्त्तमाने । अथ खलु मैत्रेयो बोधिसत्वो महासत्वस्तथानिषण्ण एव भगवन्तं मनसा गाथया पृच्छतिस्म ।

यामि तथागत पर्व्वतराजगृध्रकूटं सह बुद्धनिवासं ।
तत्र च गन्धुवुलोकप्रदीपा पूज करोमि अचिन्तयतुल्यं ॥

अथ खलु भगवान् मैत्रेयस्य बोधिसत्वस्य महासत्वस्य चेतसैव चेतःपरिवितर्कमाज्ञाय मैत्रेयो बोधिसत्वो महासत्वो मनसा गाथया प्रेषयतिस्म ।

गच्छहि त्वं अजिता जितमारा पर्व्वतराज जिनैरभिवुस्त ।
तत्र च भेष्यवि अर्थं महान्तो सर्व्वजगस्य अनन्तर क्षिप्रं ॥

अथ खलु मैत्रेयो बोधिसत्वो महासत्वो भगवता गाथया मनसानुप्रेषितो भगवन्तं मनसा वन्दित्वा भगवन्तं मनसैव त्रिः प्रदक्षिणीकृत्य ततः पर्षन्मण्डलानुपक्रम्य येनानन्तबुद्धनिवासो गृध्रकूटः पर्व्वतराजो येन च महाचैत्यस्तेनोपसंक्रान्त उपसंक्रम्य तत्क्षणमेव गृध्रकूटपर्व्वतराजं समविपुलविस्तीर्णमपगततृणस्थाणुकण्टकपाषाणशर्कराकलं सर्व्वशःसामन्तकं सप्तरत्नमयमध्यतिष्ठत् रुचिरेन्द्रनीलरत्नमयं भूतलं दिव्यंचाचिन्त्यमनौपम्यं सर्व्वालङ्काररत्नविभूषितमसंख्येयानेकरत्नव्यूहप्रतिमण्डितं दिव्यं तुषितकायिकवस्तुप्रतिमण्डितोपचारं विचित्रधूपघटिकानिधूपितं । माल्यदामालङ्कृतं नानापुष्पाभिकीर्णन्दिव्यामरवाद्यनिनादितनिर्घोषं समुच्छ्रितछत्रध्वजपताकाकुलाकीर्णम्बितानविततं मण्डपमात्रमध्येच मण्डलमात्रस्य सप्तरत्नमयं दिव्यं सिंहासनमभिनिर्म्मिमितेस्म ।

अनन्तरवस्त्राकीर्णं मृदुकाचिलिन्दिकसुखसंस्पर्शं दिव्यं तुषितकायकप्रावारप्रत्यास्तीर्णमुपरि गर्भस्थालकमुभयानुलोहितोभयधारकोशायामविस्तारोच्छ्रितन्देवमनुष्यातिक्रान्तजम्बूनदमयञ्च रमणीयं पादपीठं मुक्ताजालपरिनद्धं दिव्यदुष्यरत्नवस्त्रसंछादितं सिंहासनोपरिवद्धञ्च दिव्यरत्नघण्टामालानिस्वनितमनोज्ञमधुरनिर्घोषं समन्ताद्वितततमहारत्नावभासप्राप्तं विमलवैदुर्य्यमहामणिरत्नस्तम्भ मत्यायतरत्नछत्रमभिनिर्म्मिमीतेस्म ।

यद्दुत भगवतः परिभोगाय । अथ खलु मैत्रेयो बोधिसत्वो महासत्वो गृध्रकूटं पर्व्वतराजं सर्व्वससामन्तकं अनेकविचित्ररत्नव्यूहालंकारमचिन्त्यमप्रतिमभिनिर्म्माय तत्क्षणमेव पुरेव चन्द्रप्रभस्य कुमारभूतस्य निवेशनं प्रविष्टोऽभूत् प्रविश्य च भगवन्तं मनसाभिवन्द्य मनस्येवच भगवन्तन्त्रिः प्रदक्षिणीकृत्य स्वके आसने निषण्णोऽभूत् । तत्रेदमुच्यते ।

निर्म्मितु पर्व्वतु दिव्यविसारे रत्न शिलातलु शोभनु रम्या ।
दिव्य विचित्र मनोमय मात्रं रत्नसिंहासनमध्ये निविष्टं ॥
छत्र च दिव्य मनोज्ञ सुघोषं दिग्मणिरत्नवभासि विशालं ।
शुद्धवैदुर्य्यमनोरमदण्डं निर्म्मिणि तत्र जिनो जिनपुत्रः ॥
निर्म्मिणि यानिच मैत्र कुवीरो पार्षतु रत्नमयं सुविचित्रं ।
आसनरत्न च क्रोशप्रमाणं तत्क्षणमेव च वेश्म प्रविष्ट इति ॥

अथ खलु भगवांस्तां महतीं सागरोपमां पर्षदां धर्म्मकथया सन्दर्शते समुत्तर्कसंप्रहर्ष समादाप्य उत्थायासनात् प्रकामन्तादृश्या एव च बुद्धव्या राजगृहात् महानगरान्निष्क्रम्य ततः तद्द्वारेणैव येन गृध्रकूटः पर्व्वतराजस्तेनैव संक्रान्त उपसंक्रम्य च येन मैत्रेयाभिनिर्म्मितो मण्डलमात्रस्तेनोपसंक्रान्त उपसंक्रम्य मैत्रेयाभिनिर्म्मिते महति रत्नसिंहासने न्यषीदद्भिक्षुसङ्घपरिवृतो बोधिसत्वमहासत्वसङ्घपुरस्कृतः सदेवयक्षगन्धर्व्वासुरगरुड़किन्नरमहोरगमनुष्यामनुष्यनमस्कृतः सागरोपमायां पर्षदि धर्म्मं देशयामास । अथ खलु चन्द्रप्रभकुमारभूतः अशीत्या प्राणिकोटीनियुतशतसहस्रैः सार्द्धं सर्व्वैर्देवभूतैरन्यलोकधात्वागतैश्च संबहुलैः बोधिसत्वमहासत्वकोटीनियुतैः सार्द्धं पुष्पधूपगन्धमाल्यविलेपनं गृहीत्वा तूर्य्यशतसहस्रैः वाद्यमानैः छत्रध्वजघण्टापताकाभिरत्युच्छ्रिताभिः महामात्याभिनिर्हारमादाय भगवतः पूजाकर्म्मणे राजगृहात् महानगराच्छिवधारेण निष्क्रम्य येन गृध्रकूटः पर्व्वतराजो येन च भगवांस्तेनोपजगामोपेत्य च भगवतः पादौ शिरसाभिवन्द्य भगवन्तं त्रिः प्रदक्षिणीकृत्य तैः पुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरछत्रध्वजघण्टापताकाभिस्तुर्य्यंभात्रावचनैश्च प्रवाद्यमानैर्महतीं पूजां कृत्वा एकान्ते न्यषीदत् । सगौरवः सप्रतीकः धर्म्मपरिपृच्छायैकान्तनिषण्णश्चन्द्रप्रभः

कुमारभूतो दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणम्य भगवन्तमेतदवोचत् । पृच्छेयमहं भगवन्तं तथागत मर्हन्तं सम्यक् सम्बुद्धं कञ्चिदेव प्रदेशं स चेत् मे भगवानवकाशं कुर्य्यात् पृष्टप्रश्नव्याकरणाय । एवमुक्ते भगवांश्चन्द्रप्रभकुमारभूतमेतदवोचत् । पृच्छ त्वं कुमार तथागतमर्हन्तं सम्यकूसम्बुद्धं यद्यदेव काङ्क्षसि नित्यकृतस्ते कुमार तथागतेनावकाशः । एवमुक्ते चन्द्रप्रभकुमारभूतो भगवता कृतावकाशो भगवन्त मेतदवोचत् । कतिभिर्भगवन् धर्म्मैः समन्वागतो बोधिसत्वो महासत्वो इमं सर्व्वधर्म्मस्वभावसमताविपञ्चितं समाधिं प्रतिलभते । कतमैश्चतुर्भिः । इह कुमार बोधिसत्वो महासत्वः शूरो भवति । सुखसम्वासो दान्तो दान्तभूमिमनुप्राप्तः स परैराक्रुष्टो वा परिभाषितो वा दुरुक्तदुरागतानाञ्च वचनपथानां भवत्यधिवासजातीयः कर्म्मदर्शानि हतमानो धर्म्मकामः । अनेकः कुमार प्रथमेन धर्म्मेण समन्वागतो बोधिसत्वो महासत्व इमं समाधिं प्रतिलभते । पुनरपरं कुमार बोधिसत्वो महासत्वः शीलवान् भवति । परिशुद्धशीलोऽखण्डशीलसृजुकशील अकल्माषशीलः अच्युतशीलोऽनिश्रितशीलोऽपरामृष्टशीलः । अनुपलम्भशीलः आर्य्यप्रशस्तशीलो विज्ञप्रशस्तशीलः । अनेकः कुमार द्वितीयेन धर्म्मेण समन्वागतो बोधिसत्वो महासत्व इमं समाधिं प्रतिलभते । पुनरपरं कुमार बोधिसत्वो महासत्व स्त्रैधातुक उत्त्रस्तचित्तो भवति सन्त्रस्तचित्तो निर्विण्णचित्तोऽनर्थिकानभिरत अनव्यवसितो मतिषक्तः सर्व्वत्रैधातुक उद्विग्नमानस अन्यत्र त्रैधातुका दुःखितान् सत्वान् मोचयिष्यामीति व्यायमेते समुदागच्छन्त्यनुत्तरायां सम्यकूसम्बोधौ । अनेन कुमार तृतीयेन धर्म्मेण समन्वागतो बोधिसत्वो महासत्व इमं समाधिं प्रतिलभते । पुनरपरं कुमार बोधिसत्वो महासत्वः सोर्द्धा भवति अतृप्तो भवति धर्म्मपर्य्युष्टो बहुश्रुतो भवति । विशारदो धर्म्मकामश्च भवति । धर्म्मगुरुकः न लाभसत्कारश्लोकगुरुकः न ज्ञातगुरुकः यथाश्रुतांश्च धर्म्मान् यथा पर्य्यवापत् परेभ्यो विस्तरेण देशयति संप्रकाशयति हितवस्तुपूर्व्वङ्गमेन चित्तेन ज्ञानलाभकामनया अपि तु खलु किमितीमे सत्वा इमान् धर्म्मान् श्रुत्वा अनिवर्त्तनीया भवेयुरनुत्तरायाः सम्यकूसम्बोधेरिति । अनेन कुमार चतुर्थेन धर्म्मेण समन्वागतो बोधिसत्वो महासत्व इमं समाधिं प्रतिलभते । एभिः कुमार चतुर्भिर्धर्म्मैः समन्वागतो बोधिसत्वो महासत्व इमं सर्व्वधर्म्मस्वभावसमताविपञ्चितं समाधिं प्रतिलभते क्षिप्रञ्चानुत्तरां सम्यकूसम्बोधिमभिसम्बुध्यते । तदनेनापि ते कुमार पर्य्यायेणैव वेदितव्यं यथायं समाधिर्बहुबुद्धदेशितो बहुबुद्धसंप्रकाशितो बहुबुद्धप्रविचित्तः बहुनां च बुद्धानां भगवतामन्तिकात् मया प्रव्रजित्वायं कुमार सर्व्वधर्म्मस्वभावसमताविपञ्चितः समाधिः विस्तरेण श्रुत उद्गृहीतः पृष्टो धारितो वाचितः प्रवर्त्तितः अरणाभावनया भावितो बहुलीकृतः परेभ्यश्च विस्तरेण संप्रकाशितः । अथ खलु भगवानिममेव बहुबुद्धनिर्हारं समाधिसुखं पूर्व्वयोगकथानिर्द्देशं भूयस्या मात्रया तस्याम्वेलायां चन्द्रप्रभस्य कुमारभूतस्य विस्तरेण संप्रकाशयति स्म ।

स्मरामि कल्पे अतुलिये अप्रमेये यदा जिनो आसि स्वराङ्गघोषः ।
स्वराङ्गघोषस्य तथागतस्य वर्षशता षष्टि अभूषि आयुः ॥





तस्यान्यबुद्धो परिमेण आशी ज्ञानेश्वरो नाम नराणमुत्तमः ।
ज्ञानेश्वरस्य द्विपदोत्तमस्य वर्षसहस्रा च द्वौ च आयुः ॥
ज्ञानेश्वरस्यापि परेण बुद्धो तेजेश्वरो नाम अभूषि अन्यः ।
तेजेश्वरस्य द्विपदोत्तमस्य षट्सप्तती वर्षसहस्र आयुः ॥
तेजेश्वरस्यापर तेन बुद्धो मतीश्वरो नाम जिनो अभूषि ।
मतीश्वरस्य द्विपदोत्तमस्य वर्षाण कोटिं परिपूर्ण आयुः ॥
मतीश्वरस्यापर तेन बुद्धो ब्रह्मेश्वरो नाम जिनो अभूषि ।
ब्रह्मेश्वरस्य द्विपदोत्तमस्य चतुर्द्दशो वर्षसहस्र आयुः ॥
ब्रह्मेश्वरस्यापर तेन बुद्धो अग्नीश्वरो नाम जिनो अभूषि ।
अग्निश्वरस्य द्विपदोत्तमस्य षष्टिस्तदा वर्षसहस्र आयुः ॥
अग्नीश्वरस्यापर तेन बुद्धो ब्रह्माननो नाम जिनो अभूषि ।
ब्रह्माननस्य द्विपदोत्तमस्य रात्रिन्दिवा सप्त अभूषि आयुः ॥
ब्रह्माननस्यापर तेन बुद्धो गणेश्वरो नाम जिनो अभूषि ।
गणेश्वरस्य द्विपदोत्तमस्य षट् वर्षकोट्यः परिपूर्ण आयुः ॥
गणेश्वरस्यापर तेन बुद्धो घोषेश्वरो नाम जिनो अभूषि ।
घोषेश्वरस्य द्विपदोत्तमस्य नव वर्षकोट्यः परिपूर्ण आयुः ॥
घोषेश्वरस्यापर तेन बुद्धो घोषाननो नाम जिनो अभूषि ।
घोषाननस्य द्विपदोत्तमस्य दश वर्षकोट्यः परिपूर्ण आयुः ॥
घोषाननस्यापर तेन बुद्धो चन्द्राननो नाम जिनो अभूषि ।
चन्द्राननस्य द्विपदोत्तमस्य रात्रिन्दिवमेक अभूषि आयुः ॥
चन्द्राननस्यापर तेन बुद्धो सूर्य्याननो नाम जिनो अभूषि ।
सूर्य्याननस्य द्विपदोत्तमस्य अष्टादशो वर्षसहस्र आयुः ॥
सूर्य्याननस्यापर तेन बुद्धो ब्रह्माननो नाम जिनो अभूषि ।
ब्रह्माननस्य द्विपदोत्तमस्य त्रिविंशति वर्षसहस्र आयुः ॥
ब्रह्माननस्यापर तेन बुद्धो ब्रह्मस्वरो नाम जिनो अभूषि ।
ब्रह्मस्वरस्य द्विपदोत्तमस्य अष्टादश वर्षसहस्र आयुः ॥
एकस्मि कल्पस्मि इमे उत्पन्ना दुर्वशता लोकविनायकानां ।
शृणोहि नामानिह कीर्त्तयिष्ये अनाभिभूतान तथागतानां ॥
अनन्तघोषश्च विघुष्टघोषः विघुष्टतेजश्च विघुष्टशब्दः ।
स्वराभिघुष्टश्च स्वरार्चितश्च स्वराङ्गसूरश्च स्वराङ्गशब्दः ॥
ज्ञानाचलो ज्ञानविशेषगुच्छो ज्ञानाभिभूतो ज्ञानसमुद्गतश्च ।
ज्ञानार्चिमान् ज्ञान अभ्युद्गतस्य विध्वस्तज्ञानस्तथ ज्ञानशूरः ॥
ब्रह्मवलो ब्रह्मवसु सुब्रह्मदेवस्तथ ब्रह्मघोषः ।

ब्रह्मेश्वरो ब्रह्मनरेन्द्रनेत्रो ब्रह्मस्वराङ्गः स्वरब्रह्मदत्तः ॥
तेजोवलिस्तेजवतिः सुतेजाः तेजस्वरो तेजसमुद्गतश्च ।
तेजोविभुस्तेजविनिश्चितश्च तेजस्वरेन्द्रः सुविघुष्टतेजाः ॥
भीष्मथ्वलो भीष्ममतिः सुभिष्माननो भीष्मसमुद्गतश्च ।
भीष्माचितिर्भीष्मोत्तरु भीष्मघोषा एते जिना लोकविनायकाभूत् ॥
गम्भीरघोषः शिरिचारणश्च विशुद्धघोषेश्वरु शुद्धघोषः ।
अननुघोषः सुविमुक्तघोषो मारथ्वलो मारचित्रासनश्च ॥
सुनेत्र शुद्धाननु नेत्रशुद्धो विशुद्धनेत्रश्च अनन्तनेत्रः ।
समन्तनेत्रश्च विशुद्धनेत्रो नेत्राभिभूतेन अनिन्दितश्च ॥
दान्तोत्तरो दान्त सुदान्तचित्तः सुशान्त शान्तेन्द्रिय शान्तमानसः ।
शान्ताननः शान्तशिली प्रशान्तः शन्तिय पारङ्गतु शान्तिशूरतः ॥
स्थितोत्तरः शान्तसुदान्तचित्तः सुदान्तशान्तेन्द्रिय शान्तमानसः ।
शान्तोत्तरः शान्तप्रिया ज्वलन्तः शान्तप्रशान्तैश्च नु शान्तिशूरः॥
गणेन्दु गणमुख्यु गणेश्वरश्च गणाभिभूर्गणिवर शुद्धज्ञानी ।
महागणेन्द्रश्च गणेन्द्रशूरो अन्यो पुनो मणिवर प्रमोचकः ॥
धर्म्मध्वजश्चो तथ धर्म्मकेतुः धर्म्मोत्तरो धर्म्मस्वभाव उद्गतः ।
धर्म्मवलश्चैव सुधर्म्मशूरः स्वभावधर्म्मोत्तरि निश्चितस्य ॥
यो नामधेयं शृणुते जिनस्य श्रुत्वा च धारेति विघुष्टनाम ।
स क्षिप्रमेतं लभते समाधिं ... ... ... ... ... ... ... ... ॥

अथ खलु भगवान् भूयस्या मात्रया इमं बहुबुद्धनिर्हार समाधिसुखं पूर्व्वयोगपरिवर्त्तश्चन्द्रप्रभस्य कुमारभूतस्य गाथाभिर्गीतेन विस्तरेण संप्रकाशयति स्म ।

एतेषु बुद्धो न परेण अन्यो अचिन्तिये अपरिमितस्मि कल्पे ।
अभूषि बुद्धो नरदेवपूजितः स नामधेयेन नरेन्द्रघोषः ॥
नरेन्द्रघोषस्य तथागतस्य षट्सप्तति वर्षसहस्र आयुः ।
अयश्च कोटीशत श्रावकानां यः सन्निपातः प्रथमो अभूषि ॥
षड्भिज्ञ त्रैविद्य जितेन्द्रियाणां महानुभावान महर्द्धिकानां ।
क्षीणाश्रवाणन्तिम देहधारिणां सङ्घस्तदा आसि प्रभाकरस्य ॥
अशीतिकोटिनियुता सहस्राः यो बोधिसत्वा नराणामभूषि ।
गम्भीरबुद्धीन विशारदानाम्महानुभावान महर्द्धिकानां ॥
अभिज्ञप्राप्ता प्रतिभानवन्तो गतिङ्गताः सर्व्वन शून्यतायां ।
ऋद्धीय गच्छन्ति च क्षेत्रकोटियो ततोऽन्तरीयान्तिक गङ्गवालिका ॥
पृच्छीत्व प्रश्नं द्विपदानमुत्तमान् पुनेन्ति तस्यैव जिनस्य अन्तिके ।
सूत्रान्तनिर्हारनिरुक्तिकोविदा आलोकभूता विचरन्ति मेदिनीं ॥





सत्वान अर्थामचरन्ति चारिकां महानुभावाः सुगतस्य पुत्राः ।
न कामहेतोः प्रकरन्ति पापं देवापि तेषां स्पृह संजनन्ति ॥
अनर्थिका भगवतिषु अनिश्रिता समाहिता ध्यान विचारगोचराः ।
विनिश्चितार्थाश्च विशारदाश्च निनामगन्धाः सद ब्रह्मचारिणः ॥
अनाहदेवा प्रतिभानवन्तो निरुक्तिनिर्द्देशपदार्थकोविदाः ।
सर्व्वत्र सन्दर्शक बुद्धपुत्राः परिगृहीताः कुशलेन कर्म्मणा ॥
अनन्तकल्पायश्चर्य्यः उद्गताः स्तुता प्रशस्ताः सद नायकेति ।
विमोक्षतत्त्वार्थपदान देशका असङ्क्लिष्टानुविशुद्धशीलाः ॥
अनोपलिप्ताः पद्मं च वारिणा विमुक्त त्रैधातुकतोऽप्रमत्ताः ।
अनोपलिप्तेष्वतिलोकधर्म्मैः विशुद्धकायाः परिशुद्धिधर्म्माः ॥
अल्पेच्छसन्तुष्ट महानुभावाः असृष्टु ते बुद्धगणाः प्रतिष्ठिताः ।
सर्व्वेषु सत्वान गतिः परायणा न घोषमात्राः प्रतिपत्तिसाराः ॥
यत्र स्थितास्तत्र परेषु देशय सर्व्वेहि बुद्धेहि परे गृहीताः ।
वेश्वासिका कोषधरा जिनानां ते सर्व्वि त्रैधातुकि असक्तमानसाः ॥
प्रशान्तचित्ताः सद रण्यगोचरा अधिष्ठिता लोकविनायकेभिः ।
भाषन्ति सूत्रान्त सहस्रकोटियो यथैव भाषन्ति त बुद्धवर्णितं ॥
विवर्ज्जिताः सर्व्वपदेभि लोकिकैः शून्याधिमुक्ताः परमार्थदेशकाः ।
अनन्तवला गुणसागरोपमाः बहुप्रभा पण्डितप्रज्ञवन्तः ॥
स चेत् कुमारो बहुकल्पकोटिय तिष्ठिहन्तैः प्रभ शेषवर्णं ।
अत्यल्पकन्तत्परिकीर्त्तितं भवेद्यथा समुद्रादुदविन्दु नेकः ॥
तस्मिं च काले स नरेन्द्रघोषो देशेति मां शान्तसमाधि दुर्द्दशं ।
महा त्रिसाहस्रिय लोकधातु देवेहि मागेहि स्तुता अभूषि ॥
तस्यो इमं शान्तसमाधि भाषतः प्रकम्पिता मेदिनि षड्विकारं ।
देवा मनुष्या यथ गङ्गवालिका विवर्त्तका ये स्थित बुद्धज्ञाने ॥
तत्रास्ति राजा मनुजान ईश्वरः शिरीवलो नाम महानुभावः ।
पुत्राण तस्यो शत पञ्च आसं अभिरूप प्रासादिक दर्शनीयाः ॥
आशीतिकोटिशत इन्द्रियानां अन्तःपुरन्तस्य अभूवि राज्ञः ।
चतुर्द्दशो कोटिसहस्र पूर्णा साधीतरो तस्य अभूषि भूयते ॥
स कार्त्तिकायान्तद पूर्णमास्यां नष्टाङ्गिका घोषधर्म्मा ददित्वा ।
अशीतिकोटिनियुतेहि सार्द्धं उपागमल्लोकगुरुस्य अन्तिकं ॥
वन्दित्व पादौ द्विपदोत्तमस्य न्यसीदि राजा पुरतो जिनस्य ।
अध्याशयं तस्य विदित्व राज्ञो इमं समाधिं द्विपदेन्दु देशया ॥
स पार्थिवः श्रुत्व समाधिमेतं उत्सृज्य राज्यं तथ प्रव्रजित्वा ।

स खेदनिर्हारपदेषु कौशलं सत्वान निर्द्देशपदेषु निश्चयः ॥
विमुक्तिज्ञानस्य च साक्षि कारिता इयं जिने ईदृश आनुशासनी ।
सकाशतो वाचमुदाहरेय्या यथावदेशि कुशलो विनिश्चये ॥
निष्कातुरावाय सदा भवेय्या इयं जिने ईदृश आनुशासनी ।
शून्याश्च धर्म्माः सद सेवितव्याः विशारदः शीलवले प्रतिष्ठितः ॥
समाधिस्थानेन समातरेय्या इयं जिने ईदृश आनुशासनी ।
न ज्ञानलाभम्पि कदाचि देशयेच्चित्तस्य चापि कुहनान्त कुर्य्यात् ॥
दृष्टिकृता सर्व्व विवर्ज्जये च इयं जिने ईदृश आनुशासनी ।
अतिभानु श्रेष्ठं वर धारणीया ज्ञानस्य नो भासु अनन्तपारो ॥
अधिष्ठानमन्त्र प्रतिभानु युक्ति इयं जिने ईदृश आनुशासनी ।
न चास्य द्वार इम मार्गभावनां प्रतिपत्तिसारो वा द्रुतयश्च भद्रको ॥
अनुशासनी अनुचरित्व शासने इयं जिने ईदृश आनुशासनी ।
अज्ञानुवर्ज्जेय्य स्थिहित्व ज्ञाने इयं जिने ईदृश आनुशासनी ॥
ज्ञानप्रतिष्ठा तथ योगभूमी योगेश्वरो बोधयि प्रस्थितानां ।
न सेवना सत्पुरुषाण नित्यं इयं जिने ईदृश आनुशासनी ॥
अपु योगिन सदा विवर्ज्जना तथागतैर्भाषित बुद्धभूमीः ।
अनुमोदिता सर्व्वि त परिहृतेहि इयं जिने ईदृश आनुशासनी ॥
वालैः प्रतिक्षिप्तमजानकेहि अभूषि तत्र पृथु श्रावकानां ।
परिगृहीता सद बोधिसत्वैरियं जिने ईदृश आनुशासनी ॥
तथागतेहि अनुबुद्धमेतं देवेहि च पूजित सत्कृतश्च ।
अनुदितं ब्रह्मसहस्रकोटिभिः कश्चित् जिनो भाषति तं समाधिं ॥
नागसहस्रेहि सदा नमस्कृता सुतपिण्डं सदा परित्यजित्वा ।
प्रिय ज्ञातिबान्धवं स प्रव्रजितस्य अन्तिकां … … … … ॥
पुत्राण पञ्चो शत प्रव्रजिंसु अन्यः पूर्व्वं चैव तथैव धीतरो ।
अन्ये च तत्र पृथुज्ञातिबान्धवाः षट्सप्तति नियुत शतसहस्रकोट्यः ॥
स प्रव्रजित्वेह सपुत्रदारः स्थपेत आहार निर्हारभूमिं ।
अधिष्ठितश्चंक्रमि अष्टवर्षा स चक्रमे वस्थितु कालु कापित ॥
स कालु कृत्वा तद राजकुञ्जरो समाधिचित्तो सुसमाहितः सदा ।
तत्रैव सो राजकुले उपपन्नो उपपादुको गर्भमलैश्च लिप्तो ॥
दृष्ट्वलोध्वनामपि तस्य भूमि महामतो नाम जनेत्रि आशीत् ।
स जातमात्रो प्रवजी कुमारो कविनु सो तिष्ठति लोकनाथो ॥
यो भाषते धर्म्म विना गद्गतो भाषित्व धर्म्मं द्विपदानमुत्तमो ।
सत्वान अर्थं प्रकरोति नायको अद्यापि सो तिष्ठति लोकनाथः ॥





जानाति मे आशयु लोकनाथो मनोमना शान्त समाधि देशितः ।
अप्रत्यया अपगतप्रत्यया च यो कुनिदेशु भवगतीनां ॥
या सर्व्वधर्म्माण स्वभावमुद्रा यः सूत्रकोटिनियुतान आगमः ।
यद्बोधिसत्वा धरन्त्यनुत्तरं कश्चिज्जिनो भाषति तं समाधिं ॥
कायस्य शुद्धी तथ वाकशुद्धी चित्तस्य शुद्धिस्तथ दृष्टिशुद्धिः ।
आरम्बणानां समतिक्रमो यः कश्चिज्जिनो भाषति तं समाधिं ॥
अविप्रनाशः फलधर्म्मदर्शनं अष्टाङ्गिका मार्गवरस्य भावना ।
तथागतैः सङ्गमु तीक्ष्णप्रज्ञता सत्यप्रवेशः सद धर्म्मज्ञानं ॥
स्कन्धः परिज्ञा समताच धातुनां अपकर्षणाज्ञायतनान सर्व्वशः ।
अनुत्पादसाक्षात्क्रिययावकारः कश्चिज्जिनो भाषति तं समाधिं ॥
प्रतिसम्विदा शान्त्यवतारज्ञानं सर्व्वाक्षराणाञ्च प्रभेदज्ञानं ।
सतुर्निवेशः समतिक्रमो यः कश्चिज्जिनो भाषति तं समाधिं ॥
घोषः परिज्ञाथ प्रामोद्यलाभः प्रीतिश्च भोती सुगतस्य वर्ण्णे ।
आर्य्या गतिर्मार्दवताच उक्तका कश्चिज्जिनो भाषति तं समाधिं ॥
न यो कुर्य्याद् भ्रकुटी स सूरतः साखिल्यमाधुर्य्यस्मितन्मुखश्च ।
दृष्ट्वा च सत्वान् प्रथमालपेति कश्चिज्जिनो भाषति तं समाधिं ॥
अनालस्यता गौरवता गुरूणां शुश्रुषणा वन्दन प्रेमदर्शना ।
उपपत्तिसन्तुष्टितसुनुता च कश्चिज्जिनो भाषति तं समाधिं ॥
आजीवशुद्धिस्तथ रण्यवासी धुतेष्टुस्थान मस्मृतेन सेषः ।
स्कन्धेषु कौशल्यमथापि धातुषु कश्चिज्जिनो भाषति तं समाधिं ॥
आयतनकौशल्य मभिज्ञज्ञानं किलेशसुपकर्षण दान्तभूमिं ।
पृथु सर्व्वमन्त्राण साधुच्छेदः कश्चिज्जिनो भाषति तं समाधिं ॥
समतिक्रमः सर्व्वभवग्रतीनां जातिस्मृतिः धर्म्मनिष्काङ्क्षता च ।
धर्म्मंच चित्तं श्रुत एषणाच कश्चिज्जिनो भाषति तं समाधिं ॥
विशेषगामी सद भावनारति आपत्तिकौशल्यत निःसृतोत्थितः ।
यत्र स्थितो अनुशयता कुहावि कश्चिज्जिनो भाषति तं समाधिं ॥
तीक्ष्णस्य ज्ञानस्य वरागमो यतो अचालियो शैलसमो अकम्पियः ।
अविवर्त्तनालक्षण धारणीमुखं कश्चिज्जिनो भाषति तं समाधिं ॥
शुक्लान धर्म्माण सदा गवेषणा पापान धर्म्माण सदा विवर्ज्जना ।
संक्लेशपक्षस्य सदा प्रचारु यो कश्चिज्जिनो भाषति तं समाधिं ॥
सर्व्वासु शिक्षासु गतिङ्गतो विदु समाध्यवस्थान गतिङ्गताश्च ।
सत्वानचो आशयु ज्ञात्व चोदको देशेति धर्म्मं वरबुद्धबोधौ ॥
विशेषज्ञानं उपपत्तिज्ञानं अनन्तज्ञानं सुसमाधिज्ञानं ।

सर्व्वगतीनां प्रविषमाधिज्ञानं कश्चिज्जिनो भाषति तं समाधिं ॥
गृहावासमुत्सृज्य प्रव्रज्य चित्त त्रैधातुके अनभिरति अनुग्रहः ।
चित्तस्य संप्रगृह्य संप्रहर्षणा देशेति धर्म्मं द्विपदानमुत्तमः ॥
धर्म्मेषुचो अनभिनिवेशतापि नः परिग्रहो धर्म्मवने सदा च ।
कर्म्मविपाकं दृढाधिमुक्तिं देशेति धर्म्मं द्विपदानमुत्तमः ॥
विनयस्यं कौशल्यविपाकज्ञानं कलहच्चिवादान तथोपेशान्तिः ॥
अविग्रहे चाप्यविवादभूमिं देशेति धर्म्मं द्विपदानमुत्तमः ।
क्षान्तीसमादानशक्तोत्सवस्थान विनिश्चये धर्म्मि सदा च कौशलं ॥
पदप्रभेदेषु च ज्ञानदर्शनं देशेति धर्म्मं करुणा जनित्वा ।
पूर्व्वान्तज्ञानं अपरान्तज्ञानन्त्रियध्वसमता सुगतान शासने ॥
परिच्छेद उक्तः सर्व्विं मण्डलस्य एवं जिनो देशयति धर्म्मस्वामी ।
चित्तव्यवस्थानमेकाग्रताच वाकाव्यवस्थान यथार्य्यभूमिः ॥
ईर्य्यापथस्यो सद कालि लक्षणा देशेति धर्म्मं पुरुषर्षभो मुनिः ।
ह्रिरिश्च तत्राप्यु प्रामादिकस्य युक्तगिरं भाषति लोकज्ञानं ॥
प्रवृत्तिधर्म्मां प्रकृतिश्च प्राणिनां देशेति धर्म्मं वरबोधिमग्र्यां ।
अनुग्रहश्चो ह्रिरिमन्ततास्य चित्तस्य चो अकुशलतो जुगुप्सना ॥
धुतस्य नुत्सर्गेत पिण्डचर्य्या देशेति धर्म्मं द्विपदानमुत्तमः ।
ह्रिरिश्च तत्राप्यु सदा समावरेता गुरूनभीवादन प्रत्युत्थानं ॥
मानस्य चो निग्रहा आदितेवं एवं जिनो देशयति धर्म्मस्वामी ।
चित्तः समुत्थानत चित्तकल्यता ज्ञानप्रतिवेध तथानुबोधं ॥
अज्ञानपक्षस्य सदा विवर्ज्जना देशेति धर्म्मान् वरबुद्ध बोधिं ।
चित्तप्रवेशस्य अनुत्तरस्य ज्ञानं निरुध्यावस्थान विनिश्चतार्थं ॥
सर्व्वेष्वनर्थान सदा विवर्ज्जना एवं जिनो देशयति धर्म्मस्वामी ।
ससङ्गता सत्पुरुषेहि नित्यं विवर्ज्जना कापुरुषान चैव ॥
जिनप्रसादे सद प्रेमताच एवं जिनो देशयि धर्म्म श्रेष्ठं ।
सङ्केत प्रज्ञप्तिव्याहारताश्च संसारदुःखान सदा विवर्ज्जना ॥
अलाभि लाभेच अपङ्कुभावमेवं जिनो देशयि धर्म्ममुत्तमं ।
सत्कारु लब्ध्वा च न विस्मयेप्या असत्कृतश्चापि भवेदुपेक्षकः ॥
भूतेपि वर्णान्न कदाचि साति ये इयं देशना लोकहितस्य ईदृशी ।
आक्रोशनां धर्म्मं सर्व्व सहत असम्भवः सर्व्वगृहीहि सार्द्धं ॥
संसर्गतां प्रव्रजितेन कुर्यादेवञ्जिनो देशयि धर्म्मस्वामी ।
बुद्धानचो गोचरमप्रतिष्ठितो अगोचरं सर्व्व विवर्ज्जयित्वा ॥
आचारसम्पन्न स दान्तचित्तो इयं धर्म्मनेत्री सुगतेन देशिता ।





ये वालधर्म्मा सद तान् विवर्ज्जयेत् कुल दुःखनां सर्व्वं विवर्ज्जयेच्च ॥
सदा रक्षितव्यं सद बुद्ध शासनमेवं जिनो देशयि धर्म्मस्वामी ।
अल्पञ्च भाष्यं मधुरं सुयुक्तं कल्याणतां मृदुवतं परेषां ॥
प्रत्यर्थिकानां सह धर्म्मनिग्रहो इयं जिने ईदृश आनुशासनी ।
पूर्व्वागमः कुशलचरीषु नित्यं उपायकौशल्यनिमित्तवर्ज्जने ॥
संज्ञाविवर्त्त तथ वस्तुलक्षणे इयं जिने ईदृश आनुशासनी ।
सूत्रान्तपर्षि यक्षेहि किन्नरेहि च या भाषिता बोधिपरो जिनेहि ॥
... ... ... . ... ...कश्चिज्जिनो भाषति तं समाधिं ।
पर्य्यङ्कया नित्यमुपस्थितेहि धनस्य श्रेष्ठं प्रवरं सुलब्धं ॥
निरामिषं ज्ञानचिकित्स उत्तमा कश्चिज्जिनो भाषति तं समाधिं ।
ज्ञानस्य कोषः प्रतिभानमक्षय सूत्रान्तकोटिन प्रवेश एष ॥
परिज्ञ त्रैधातुक भूतज्ञानं कश्चिज्जिनो भाषति तं समाधिं ।
कालो अयं देशित पारगामिनां नावापि चो ओघगतान एषा ॥
कीर्त्तिर्यशो वर्द्धति वर्णमाला येषामयं शान्तसमाधि देशितः ।
प्रपश्च एषाच तथागतानां स्तवस्य एषो पुरुषर्षभानां ॥
गुण बोधिसत्वान न यस्य अक्षयो येही अयं शान्तसमाधि देशितः ।
मैत्री इयं बोधि स मे प्रकाशिता उपेक्षियं कारुणिकान भूमिं ॥
आश्वासियन्तेषु महाशयानां येषां कृते नेष समाधि भाषितः ।
प्रतिपत्तिय देशितः सिंहनादिना मितु बुद्धज्ञानस्य वर आगमः ॥
सर्व्वं सधर्म्माण स्वभावमुद्राः समाध्यपदेशितु नायकेभिः ।
सर्व्वज्ञज्ञानस्य च आहरित्रिका चरिया इयं बोधयि प्रस्थितानां ॥
चित्रासन मायि च सुपचापि समाध्ययं शान्त जिनेन देशितः ॥
विद्या इयं धर्म्मस्थिता न गायिता अमित्रमध्ये च परमाच रक्षा ।
प्रत्यर्थिकानां सहधर्म्मविग्रहः समाध्ययं शान्त समाधि देशितः ॥
प्रतिभानभूमि इयं प्रकाशिता वलाविमोक्षा तथ इन्द्रियाणि ।
विशिष्ट अष्टादश बुद्धधर्म्मा समाधिशान्तेषु निषेव्यमानाः ॥
दर्शान पर्य्येष्टिवलान भूता पूर्व्वनिमित्तम्मि च बुद्धज्ञाने ।
ये बुद्धधर्म्माश्च पुरुषोत्तमेन प्रकाशिताश्चानुकम्पिताः ॥
बुद्धान पुत्रेभि रयं प्रतिच्छितो विमोक्षकामानयु मार्ग देशितः ।
प्रीतिश्च तस्मिं सुगतात्मजानां शृणित्विमं शान्तसमाधि दुर्द्दृशं ॥
या बुद्धज्ञानस्य च पारिपूरिताः यामेषते पण्डितु बोधिसत्वः ।
विशुद्धचित्तस्य शुचि निरङ्कुशो ह्येवं निषेवेत समाधिशान्तं ॥
परिशुद्धको योऽस्य यथा जिनानां विमोक्षज्ञानस्य विमुक्तिदर्शनं ।

अर्संक्लिष्टः सद रागबन्धने इमं निषेवेत सुमाधिभद्रकं ॥
अभूमि दोषविगमश्च मोहे ज्ञानस्य चो अग्र मुक्तिमिच्छतम् ।
विद्याय उत्पादु अविद्यमाननं इमं निषेवेत समाधि शान्तं ॥
विमुक्तिसाराणि य तृप्तिभाषिता ध्याईन यं शान्तु समाधि देशितः ।
चतुश्च बुद्धान अतीन्द्रियानां इमं निषेवेत समाधि शान्तं ॥
अभिज्ञ एषा बहुक्षत्रे दर्शिता ऋद्धिश्च बुद्धान अनन्त दर्शिता ।
या धारणी सापि इतो न दुर्लभा निषेवमानस्य समाधिमेतं ॥
शान्तेन्द्रियस्यो इह स्यातु बोधय इदमधिष्ठानन्तु दर्शितं ।
सूक्ष्मं च ज्ञानं विपुलं विशुद्धं निषेवमानस्य समाधिमेतं ॥
सुबुद्धं ते नैष अयुक्तयोगैः विवर्त्तनं सर्व्वंशु अक्षराणां ।
न सक्तु घोषेण विजाननाय यानो अयं शान्त समाधिन श्रुतः ॥
ज्ञानन्तु विज्ञैरपु बोधिसत्वैर्यथा वयन्देशित धर्म्मस्वामिना ।
प्रतिबुद्ध शान्तेहि अनिन्दितेहि इमं समाधिं प्रतिषेवमानैः ॥
आरब्धवीर्य्यैहि सुउद्गृहीतमुपस्थितं चापि सदा सुधारितं ।
दुःखक्षयोऽति निर्बोधज्ञानं इमं समाधिं प्रतिषेवमानैः ॥
सर्व्वेष धर्म्मान संक्रान्ति भाषिता एवं सर्व्वासु भगवतीषु ।
ज्ञानाग्रु बुद्धान महावलानां कश्चिज्जिनो भाषति तं समाधिं ॥
तस्या कुमारस्मिमि गाथ श्रुत्वा अष्टाशीतिनियुत शतसहस्रपूर्णाः ।
घोषानुगा शान्ति लभिंसु तत्र अविवर्त्तका ये स्थित बुद्धज्ञाने ॥
दृढप्रलम्बमवती कुमारं अद्यापि सो तिष्ठति लोकनाथो ।
पृच्छामि त्वां दानकमेकमर्थं कुतः त्वया एष श्रुतः समाधिः ॥
कुमार राजन् अवची शृणोहि दृढस्मि कोटीनियुतं जनानां ।
एकस्मि कल्पस्मि मिते च सत्कृता अयञ्च मे शान्तसमाधि पृच्छति ॥
चत्वारि कल्या नवतिश्च अन्य कल्पान कोटी नियुता सहस्रा ।
जातिस्मरोऽ भोम्यहु तत्र तत्र न चापि गर्भे उपपद्यि जातु ॥
ततो मया एष समाधि भाषितः शुद्धं श्रुतस्तेष जिनान भाषता ।
श्रुत्वा च उद्दिष्ट जनेत्व छन्दन्निष्काङ्क प्राक्तेन स प्रशिख्य बोधिं ॥
ये भिक्षुसङ्घं परिपृच्छदेत्ति पर्य्यापुनन्तिस्म इमं समाधिं ।
उपस्थयेमी अहु तत्र गौरवं यथैव लोकार्थकराण अन्तिका ॥
यैषा मया अन्तिक एकगाथा उदिष्ट चर्य्यां चरतानुलोमिकीं ।
मन्यामिता नय्यहु शास्तु एते उपस्थयेमी अहु बुद्ध गौरवं ॥
यश्चापि मां पुच्छितु कश्चिदेव पर्य्यापुनत्त इमु संसमाधिं ।
स्वप्नान्तरेऽपीह नमेऽस्ति काङ्क्षा नाहन्न भेष्ये जिन लोकनायकः ॥





वृद्धेषु मध्येषु नवेषु भिक्षुषु सगौरवो भोम्यहु सप्रतीसः ।
सगौरवस्यो मम वर्द्धते यशः पुण्यञ्च कीर्त्तिश्च गुणास्तथैव ॥
कालीम्विवादेषु न भोमि उत्सुको अल्पोत्सुको भोम्यहु तत्र काले ।
अन्या गति भोति करित्व पापकमन्या गतिर्भोति करित्व भद्रकं ॥
अयुक्तयोगानु असंयतानां मनोज्ञ तेषां वचनं श्रुणित्वा ।
कर्म्मस्वको भोम्यहु तस्मि काले कृतस्य कर्म्मस्य न विप्रणाशः ॥
नक्षत्रस्यैवो भवतीपनायणं क्षान्तिबलं शृङ्ख हु बुद्धवर्णितं ।
क्षान्तिः सदा वर्णित नायकेभिः क्षान्तिं निषेवित्व न बोधि दुर्लभाः ॥
अहञ्च भोमी सद शीलवन्तो अन्यांश्च शीलस्मि प्रतिष्ठयेमि ।
शीलस्य वर्णं सदहं भणामि ग्राह्यश्च भोती मम तत्र भाषितं ॥
अरण्यवर्णञ्च सदापि भाषे शीलस्मि चो भोमि सदा प्रतिष्ठितं ।
समादयेमि अहु नित्यपोषे तांश्चैव बोधाय समादयेमि ।
तान् ब्रह्मचर्य्येऽपि समादयेमि अर्थस्मि धर्म्मस्मि प्रतिष्ठयेमि ॥
तेषाञ्च बोधेर्बहु बोधिमार्गं यस्मिन्निमे भोन्ति अनन्त संज्ञाः ।
स्मराम्यहं कल्पमतीतमध्वनी यदा जिनो आसि स्वराङ्गघोषः ॥
प्रतिज्ञा च तस्यो पुरतः कृता मे क्षान्तिबलो भो बहु तस्मि कालं ।
तत्र प्रतिज्ञाय प्रतिष्ठिहित्वा वर्षाणि कोटी चतुरोऽथ सीतिं ॥
मारेण हं कुत्सित पश्चितश्च नचैव चित्तं मम जातु क्षुब्धं ।
जिज्ञासनां तत्र करित्व मारो ज्ञात्वान मह्यं दृढ क्षान्ति मैत्री ॥
प्रसन्नचित्तश्चरणानि वन्द्य मे पञ्च शता बोधिवराय प्रस्थिताः ।
अमत्सरी भोम्यहु नित्यकालं त्यागस्य चो वर्णु सदा प्रभाषे ॥
आढ्यश्च भोमी वरवान्महात्मा दुर्भिक्षकाले बहु भोमि दायकः ।
ये भिक्षु धारेन्ति इमं समाधिं ये चापि वाचेन्ति य उद्दिशन्ति ॥
करोमि तेषां अहु पारिचर्य्यां सर्व्वेति भेष्यन्ति नराण श्रुत्तमाः ।
धर्म्मेण तेनाह मनुत्तरेण पश्यामि बुद्धम्बहु लोकनाथं ॥
लभित्व प्रव्रज्य जिनान शासने भवामि नित्यम्बिदु धर्म्मभाणकः ।
धूताभियुक्तो अहु भोमि नित्यं आरण्य प्रारण्य सदा निषेवी ॥
नाहारहेतोः कुहनां करोमि सन्तुष्ट भोमी इतरेतरेण ।
अनीषुंको भोम्यहु नित्यकालं कुलेषुचाहं न च भोमि निश्रितः ॥
कुलेषु स कस्य हि ईर्ष्य वर्द्धते अनीषुकस्तुष्टि धनेषु विन्दमि ।
मैत्रीविहारी अहु भोमि नित्यं आक्रुष्ट सन्तो न जनेमि मैत्रीं ॥
मैत्रीविहारी स्थिमि सुरतश्च चतुर्द्दिशं वर्द्धति वर्णमाला ।
अल्पेच्छ सन्तुष्ट भवीमि नित्यं आरण्यकश्चैव धुताभियुक्तः ॥
नचोत्सृजामि अहु पिण्डपातं दृढं समादान धुतेषु वन्दमि ।

श्राद्धश्च भोमी सद सप्रसादो बहुप्रसादः सद बुद्धशासने ॥
प्रसाद बुद्ध लोभिमि अनुशंसा प्रासादिको भोमि अहीन-इन्द्रियः ।
यत्रैव भावाम्यहु तत्र तिष्ठे प्रतिपत्तिसारो अहु भोमि नित्यं ॥
प्रतिपत्तिसारस्यिमि देवनागा कुर्व्वन्तु उपस्थानु प्रसन्नचित्ताः ।
गुणा इमे वाचक कीर्त्तिता मे एताश्च अन्याश्च बहू अनेके ॥
ये शिक्षितव्याः सद पण्डितेन यो इच्छती बुद्धितु बुद्धबोधिं ।
स्मराम्यतो बहुतर दुष्कराणी ये पूर्व्वकल्पे चरिम्यनेकम् ॥
बहुपि दाशितुन्न शक्यं गच्छामि तावत् सुगतस्य अन्तिकं ।
सुतीक्ष्णप्रज्ञो विदु बोधिसत्वो तस्मिन् क्षणे स्पर्शयि पञ्चभिज्ञं ॥
ऋद्धि यस्य गच्छ जिनस्य अन्तिकं स प्राणकोटीभिरशीतिभिः सह ।
दृढवलो परमु उदग्र आसीत् सार्द्धं तदा कोटिशतेहि षष्ठिभिः ॥
उपसंक्रमी मूल तथागतस्य वन्दित्व पादौ पुरतो न्यषीदत् ।
अध्याशयन्तस्य विदित्व राज्ञो इमं समाधिं द्विपदेन्द्र देशयी ॥
श्रुत्वा च सो प्रार्थित सत्समाधिं उज्झित्व राज्यं निरपेक्ष प्रव्रजी ।
स प्रव्रजित्वा न इमं समाधिं भावेति वाचेति प्रकाशयेती ॥
स षष्टिभिः कल्पसहस्र पश्चात् पद्मोत्तमो नाम जिनो अभूषी ।
षष्टिस्तदा कोटिशता अनूनका ये राज्ञी सार्द्धं उपसंक्रमि जिनान् ।
ते चापि श्रुत्वेव समाधिमेतं तुष्टा उदग्रास्तद प्रव्रजिंसुः ॥
ते प्रव्रजित्वा न इमं समाधिं धारेतुषु वाचेतुषु प्रकाशयेसुः ।
षष्ठिन कल्पा नियुतान अत्यया तस्यर्शिषु बोधिवरमेककल्पे ॥
अनन्तज्ञानोत्तरनामधेया अभूषि बुद्धा नरदेवपूजिताः ।
तत्रैकमेको द्विपदानमुत्तमो वेति सत्वान्यथ गङ्गवालिका ॥
शिरिवलो नाम अभूषि राजा इमां चरन्तो वरबोधिचारिकां ।
ये मह्यं पुत्राः शतपञ्च आसन्निम एव एते अनुधर्म्मपालाः ॥
जननी च यासी अभूव मह्यं सा मायदेवी न हि तस्मि काले ।
चतुःसहस्रा कोटिसहस्रपूर्णा ते धीतरो या मम संविनिर्वृताः ॥
दृढवरो नाम यशासी राजा प्रभूतकोशि वलचक्रवर्त्ती ।
शुद्धोदनो राज तस्मि काले पिता अभूद्यो मम तत्र तत्र ॥
एवं मया कालसहस्रकोट्य आरब्धवीर्य्येण अतन्द्रितेन ।
समाधि पर्य्येष्ट अयं विशुद्धः समुदानयन्नेनि समग्रबोधिं ॥
कुमार तस्माद्विय बोधिसत्व आकाङ्क्षते एव तु समाधि भावितुं ।
आरब्धवीर्य्याणि परे कुजीविते मम कुमारा अनुशिक्षता सदा ॥

बहुबुद्धनिर्हारसमाधिसुखपरिवर्त्तो नाम चतुर्दशमः ॥





## पञ्चदशपरिवर्त्तः ।

तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूत मामन्त्रयते स्म । तस्मात्तर्हि कुमार यो बोधिसत्वो महासत्व इमं समाधिमुद्ग्रहीष्यति धारयिष्यति वाचयिष्यति पर्य्यवाप्स्यति प्रवर्त्तयिष्यति देशयिष्यति उपदेक्ष्यति स्वाध्यास्यति । परेभ्यश्च विस्तरेण सम्प्रकाशयिष्यति । तस्य चत्वारो गुणानुशंसाः प्रतिकाङ्क्षितव्याः कतमे चत्वारः यदुत अनभिभूतो भविष्यति । पुण्यैरनवमर्दनीयो भविष्यति । प्रत्यर्थिको अप्रमेयो भविष्यति ज्ञानेन । अनन्तश्च भविष्यति प्रतिभानेन । यो हि कश्चित् कुमार बोधिसत्वो महासत्व इमं समाधिमुद्ग्रहीष्यति धारयिष्यति वाचयिष्यति पर्य्यवाप्स्यति प्रवर्त्तयिष्यति उपदेक्ष्यति स्वाध्यास्यति । परेभ्यश्च विस्तरेण सम्प्रकाशयिष्यति । तस्येमे चत्वारो गुणानुशंसाः प्रतिकाङ्क्षितव्याः ॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत ।

अनाभिभूतः पुण्येहि नित्यकालं भविष्यति ।
समाधि शान्तु धारयित्वा सर्व्वबुद्धान गोचरं ॥
पुण्येहि रक्षितः शूरो नित्यकालं भविष्यति ।
चरन् स परमां शुद्धां विशिष्टां बोधिचारिकां ॥
नास्य प्रत्यर्थिको जातु विहेठां कश्चित् करिष्यति ।
परिगृहीतो बुद्धेहि नित्यकालं करिष्यति ॥
अप्रमेयश्च ज्ञानेन नित्यकालं भविष्यति ।
अनन्तप्रतिभानेन धारयं शान्तिमागतिं ॥

सततमनभिभूतु पुण्यस्कन्धो भविष्यति श्रेष्ठ चरन्तु बोधिचर्य्यां ।
न भविष्यति प्रत्यर्थिका दृष्या इम वरशान्त समाधि धारयित्वा ॥
ज्ञानु विपुल तस्य भोति तीक्ष्णं तथ प्रतिभानु मनन्त यत्तु शुद्धं ।
भविष्यति सद तस्य पण्डितस्य स्मृतिधलमेव च धारणीवलञ्च ॥
परमप्रियमनाशु पण्डितानां ... ... ... ... ... ... ... ... ।
भविष्यति सुकुमार दर्शनीयो इम वरशान्त सासाधि धारयन्तो ॥
द्रक्षति बहुबुद्ध लोकनाथान् अतुलिय काहिति पूजनानां ।
म च भविष्यति तस्य अन्तरायो इम वरशान्त समाधिमेषतोहि ॥
भविष्यति पुरतः स्थिहित्व लोकनाथा सुरुचिर गाथशतेहि तुष्टचित्ताः ।
न च भविष्यति तस्य हानी इम वरशान्त समाधि धारयित्वा ॥
स्थास्यति पुरतोऽस्य लोकनाथः सुरुचिरलक्षणकाय व्यञ्जनेभिः ।
न च व्यकाष्यति तस्य ज्ञानहानी इम वरशान्त समाधि धारयित्वा ॥
न भवति कदाचि दीनचित्तः सतत भविष्यति आढ्यूनो दरिद्रः ।
न च भविष्यति उद्ग्रहीष्यति से चित्तो इम वरशान्त समाधि धारयित्वा ॥

न स भविष्यति वा सुलक्षणेषु मद्दीपति भेष्यति राज्यचक्रवर्त्ती ।
सद भविष्यति राज तस्य क्षेमं इम वरशान्त समाधि धारयित्वा ॥
खानु विपुल नात्र संशयोऽस्ति क्षयदि तु कल्पशतेहि भाषमाणैः ।
श्रुतस्व मे वर शान्तसमाधि भूमिरपथ उपदिष्ट तथास्थितचेतो धीरो ॥
अपरिमित अनन्तकल्पकोट्यो दशवल तस्य भयेयुरानुशंसा ।
न च फल परिकीर्त्तिता भवेय्याँ यथ जलविन्दु गृहीतु. सागरान्तो ॥
हर्षितु सुकर तस्मि काले उच्छ्रितु प्राञ्जलिको जिनोत्तमस्य मानः ।
दशवलाहि सुख्यो स्थितो उदग्रे गिरिवरा य उदार दान याति ॥

अचिन्तिया महावीर लोकनाथ प्रभङ्करः ।
यावच्च मे नरेन्द्रेण आनुशंसाः प्रकाशिताः ॥
आख्याहि मे महावीर हितैष्यानुकम्पको ।
कोवा न पश्चिमे काले इदं सूत्रं शृणिष्यति ॥
तं मे वद व्याख्याकाले किङ्किनीसतस्वरः ।
अशङ्कस्थानी भगवानिमां वाचं प्रभाषसे ॥
कुमार शृणु भाषिष्ये प्रतिपत्तिमनुत्तरां ।
यो धर्म्ममनुशिक्षन्तो इदं सूत्रं शृणिष्यति ॥
पूजां कुर्व्व जिनेन्द्राणां बुद्धज्ञानगवेषकः ।
मैत्रचित्तं निषेवन्तो इदं सूत्रं शृणिष्यति ॥
धूतान् गुणांश्च तेषां गुणान् श्रेष्ठान् निषेवतः ।
प्रतिपत्तौ स्थिहित्वा च इदं सूत्रं शृणिष्यति ॥
न पापकारिणो हस्तादिदं सूत्रं शृणिष्यति ।
न यैर्विरागितं शीलं लोकनाथान शासने ॥
ब्रह्मचारीण सूराणां येषां चित्तमलोलुपम् ।
अधिष्ठितानां बुद्धेहि तेषां हस्तात् शृणिष्यति ॥
ये हि पुरिमका बुद्धा लोकनाथ उपस्थिताः ।
तेषां हस्तादिदं सूत्रं पश्चात् काले शृणिष्यति ॥
ये तु पूर्व्वासु जातीषु अभूवन्नन्यतीर्थिकाः ।
तेष्विमं श्रुत्व सूत्रान्तं सौमनस्यन्न भेष्यति ॥
ये मम प्रव्रजित्वेह शासने जीवितार्थिकाः ।
लाभसत्कारभीभूता अन्यमन्यं प्रतिक्षिपी ॥
अध्योपिना परस्ती पूर्व्वेहु भिक्षु असंयताः ।
लाभकामाश्च दुःशीला इदं सूत्रं न श्रद्दधि ॥
पुण्यानुप्राप्त्या बुद्धेहि ध्यानप्राप्त्याप्यनर्थिकाः ।





निश्रिताश्चात्मसंज्ञाया इदं सूत्रं न श्रद्दधे ॥
लौकिकध्यानफलसंज्ञी भेष्यन्ति कालि पश्चिमे ।
अर्हपिनुश्च ते भुक्ता बुद्धबोधि प्रतिक्षिपी ॥
यथैव जम्बुद्वीपस्मि भिन्देय्या सर्व्वचेतियां ।
यश्च प्रतिक्षिपे सूत्रं इदं पापं विशिष्यते ॥
यश्चा हन्त घाटेया यथा गङ्गाय वालिकाः ।
यश्च प्रतिक्षिपेत् सूत्रं इदं पापं विशिष्यते ॥
कउत्सहति युष्माकं पश्चिमे कालु दारुणे ।
स धर्म्मे नोपवर्त्तते इदं सूत्रं प्रकाशितुं ॥
रोदन्ते उत्थितस्तत्र कुमारो जिनमब्रवीत् ।
सिंहनादन्नदत्येवं पुत्रा बुद्धस्य औरसाः ॥
अहन्निर्वृत्ति सम्बुद्धे पश्चिमे कालु दारुणे ।
सूत्र वैस्तारिकां कुर्य्यात् त्यजित्वा कायु जीवितं ॥
सहिष्याम्यत्र वालानाममूनां परिभाषणां ।
आक्रोशात्तर्ज्जनाच्चैव अधिवासिष्य नायक ॥
क्षपेयं पापकं कर्म्म यन्मया पुरि मे कृतं ।
अन्येषु बोधिसत्वेषु व्यापादो जनितोऽपि वा ॥
स्थयित्वा पाणि मूर्द्धस्मिं बुद्धः काञ्चनसन्निभं ।
शास्ता चन्द्रप्रभं प्राह मञ्जुघोषस्तथागतः ॥
करोमि ते अधिस्थानं कुमारा कालि पश्चिमे ।
न ब्रह्मचर्य्यान्तरायो जीवितस्य च भेष्यति ॥
अन्य चाष्टौ शतान्यत्र उत्थिता धर्म्मभाणकाः ।
वयम्पि पश्चिमे काले अत्र सूत्रस्य धारकाः ॥
देवनागयक्षाणां अशीतिः कोट्युपस्थिताः ।
अन्ये च नियुता षष्टि वदन्ते लोकनायकाम् ॥
वयमिमेषां भिक्षूणां य इमे अद्य उत्थिताः ।
तस्मिं पश्चिमे काले रक्षाङ्क दासनायकाः ॥
अस्मिन् सूत्रे प्रकाशिते बुद्धक्षेत्राः प्रकम्पिताः ।
यथा वालिक गङ्गाया अधिस्थानेन शास्तुतः ॥
ये च प्रकम्पिताः क्षेत्राः सर्व्वेषु बुद्धनिर्मिताः ।
प्रेषिता लोकनाथेहि येहि धर्म्माः प्रकाशिताः ॥
एकैकतश्च क्षेत्रातः सत्वकोट्याह्यविकियाः ।
एवं धर्म्मन्तदा श्रुत्वा बुद्धज्ञाने प्रतिष्ठिताः ॥

इतश्च बुद्धक्षेत्रातो नवतिः सत्त्वकोटियः ।
बोधिचित्तं समुत्पाद्य बुद्धं पुष्पैरवाकिरन् ॥
ते व्याकृता नरेन्द्रेण कल्पकोट्यास्त्रशीतिभिः ।
सर्व्वेऽप्येकत्र कल्पस्मि भविष्यन्ति विनायकाः ॥
भिक्षवः भिक्षुणीकाश्चैव उपासक उपासिकाः ।
षट्‌सप्ततिभिः प्राणकोट्या येहि सूत्रमिदं श्रुतं ॥
तेऽपि व्याकृत बुद्धेन द्रक्ष्यन्ते लोकनायकान् ।
यथा वालिक गङ्गायाश्चरन्तो बोधिचारिकां ॥
सर्व्वेषां पूजका हेत्ति बुद्धज्ञानगवेषकाः ।
तत्र तत्र श्रुणिष्यन्ति इदं सूत्रं निरुत्तरं ॥
मैत्रेयो ह्यस्य बुद्धस्य पूजां कृत्वा निरुत्तरां ।
स धर्म्मश्रेष्ठ धारित्वा गमिष्यन्ति सुखावतीं ॥
यत्रासौ विरजो बुद्धो अमिताभस्तथागतः ।
तस्य पूजां करिष्यन्ति अत्र बोधिय कारणात् ॥
त्रिसप्तभिरसंख्येया कल्पानां या अनागताः ।
न दुर्गतिं गमिष्यन्ति श्रुत्वेदं सूत्रमुत्तमं ॥
ये केचित् पश्चिमे काले श्रोष्यन्ते सूत्रमुत्तमं ।
अश्रुपातञ्च कार्हित्ति सर्व्वै स्तैः सत्कृतोह्यहं ॥
आरोचयामि सर्व्वेषां यावन्तः पूजकाः स्थिताः ।
या विन्दामि इमा बोधि या मे कृच्छ्रेण स्पर्शिता ॥

समाध्यनुपरिन्द्रनापरिवर्त्तो नाम पञ्चदशमः ॥

---

## षोडशपरिवर्त्तः ।

तत्र खलु भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म । तस्मात्तर्हि कुमार बोधिसत्त्वेन महासत्त्वेनेमानि सर्व्वधर्म्मस्वभावसमताविपञ्चितायाः समाधेरचिन्त्यानप्रमेयान् गुणानुशंसान् निर्हारपदान् श्रुत्वा नोत्त्रसितुकामेन न सन्त्रसितुकामेन न सन्त्रासयितुकामेन अचिन्त्यबुद्धधर्म्मनिर्देशकुशलेन भवितव्यं । अचिन्त्यबुद्धधर्म्माविमुक्तिकेन भवितव्यं । अचिन्त्यबुद्धधर्म्मपरिपृच्छाकुशलेन भवितव्यं । अचिन्त्यबुद्धधर्म्मपर्य्येषणाकुशलेन भवितव्यं । अचिन्त्यांश्च बुद्धधर्म्मान् श्रुत्वा नोत्त्रसितव्यं न सन्त्रसितव्यं न सन्त्रासमापत्तव्यं । एवमुक्ते चन्द्रप्रभः कुमारभूतो येन भगवांस्तेनाञ्जलिं प्रणम्य भगवन्तमेतदवोचत् । यथा कथं पुनर्भगवन् बोधिसत्त्वो महासत्त्व अचिन्त्यबुद्धधर्म्मनिर्देशकुशलो भवति । अचिन्त्यबुद्धधर्म्मा-





विमुक्तश्च अचिन्त्यबुद्धधर्म्मपरिपृच्छाकुशलश्च अचिन्त्यबुद्धधर्म्मपर्य्येषणाकुशलश्च भविष्यति । अचिन्त्यांश्च बुद्धधर्म्मान् श्रुत्वा नोत्त्रस्यति न सन्त्रस्यति न सन्त्रासमापत्स्यते । एवमुक्ते भगवान् चन्द्रप्रभकुमारभूतमेतदवोचत् । यः कुमार बोधिसत्त्वो महासत्त्व इमं सर्व्वधर्म्मस्वभावसमताविपञ्चितसमाधिं श्रोष्यति श्रुत्वा चोद्ग्रहीष्यति धारयिष्यति वाचयिष्यति पर्य्यवाप्स्यति प्रवर्त्तयिष्यति अरणाभावनया भावयिष्यति । परेभ्यश्च विस्तरेण सम्प्रकाशयिष्यति । स कुमार बोधिसत्त्वो महासत्त्वोऽचिन्त्यबुद्धधर्म्मनिर्देशकुशलो भविष्यति । अचिन्त्यबुद्धधर्म्माधिमुक्तश्च अचिन्त्यबुद्धधर्म्मपरिपृच्छाकुशलश्च अचिन्त्यबुद्धधर्म्मपर्य्येषणाकुशलश्च भविष्यति । अचिन्त्यांश्च बुद्धधर्म्मान् श्रुत्वा नोत्त्रस्यति न सन्त्रस्यति न सन्त्रासमापत्स्यते । अस्मिन् खलु पुनः सर्व्वधर्म्मस्वभावसमताविपञ्चितायाः समाधेरप्रमेयगुणानुशंसानिर्हारपदेषु भगवता चन्द्रप्रभस्य कुमारभूतस्य निर्दिश्यमानेषु ॥

अथ खलु चन्द्रप्रभः कुमारभूत इमानि सर्व्वधर्म्मस्वभावसमताविपञ्चितायाः समाधेरप्रमेयगुणानुशंसानिर्हारपदान्यचिन्त्यानि भगवतः श्रुत्वा तस्मिन् समये चन्द्रप्रभः कुमारभूत इमं सर्व्वधर्म्मस्वभावसमताविपञ्चितं समाधिराजं प्रतिलब्धवान् । अप्रमेयासंख्येयाश्च बोधिसत्त्वा महासत्त्वा अभिज्ञानस्य लाभिनोऽभूवन् अप्रमेयाणां च सत्त्वानां महाकरुणावतान्यभिमुखानि चित्तान्युत्पन्नानि । अयञ्च त्रिसहस्र महासहस्र लोकधातुः षड्विकारं प्रकम्पितः कम्पितः चलितः प्रचलितः बोधितः प्रबोधितः सम्प्रबोधितः क्षुभितः प्रक्षुभितः सम्प्रक्षुभितः । रणितः प्ररणितः सम्प्ररणितः गर्ज्जितः प्रगर्ज्जितः सम्प्रगर्ज्जितः । पूर्व्वा दिगवनमति पश्चिमा दिगुन्नमति । पश्चिमा दिगवनमति पूर्व्वा दिगुन्नमति । उत्तरा दिगवनमति दक्षिणा दिगुन्नमति । दक्षिणा दिगवनमति उत्तरा दिगुन्नमति । अन्तादवनमति मध्यादुन्नमति । अन्तादुन्नमति मध्यादवनमति । अप्रमेयस्य चाभासस्य लोके प्रादुर्भावोऽभूत् । महच्च दिव्यं गन्धवर्षमभिप्रावर्षत । यावन्तश्च देवा देवपुत्राश्च सन्निपतिताः सन्निषण्णाश्च धर्म्मश्रवणाय ते उपर्य्यन्तरीक्षेऽभ्युद्गम्य इमं सर्व्वधर्म्मस्वभावसमताविपञ्चितसमाधेरप्रमेयान् गुणानुशंसानिर्हारपदान् श्रुत्वा ते सर्व्वदेवा देवपुत्राश्च तुष्टा उदग्रा आत्तमनस्काः प्रमुदिताः प्रीतिसौमनस्यजाता हाहाकारकिलिकिलाप्रक्ष्वेडितनिनादनिर्घोषाण्यकार्षुः महान्तं च नानाविधैः दिव्यैः पुष्पवर्षमवसृजन्ति स्म ॥ दिव्यानि चानेकानि च सूर्य्यकोटिनियुतशतसहस्राणि पराहनति स्म ॥ एवं चैकोदाहारस्वरेण वाचो भाषन्ते स्म ॥ अहो सुलब्धा अस्माकं लाभाः यैरस्माभिरिमान्यप्रमेयासंख्येयानि गुणानुशंसानिर्हारपदानि भगवतोऽन्तिकाच्छ्रुतानि । तेरयं भगवन् सर्व्वे सहिताः समग्रा यथायञ्चन्द्रप्रभो बोधिसत्त्वो महासत्त्वो सर्व्वधर्म्मस्वभावसमताविपञ्चितस्य समाधेर्लाभी तथा वयमपि भगवन् सर्व्व एवम्विधस्य सर्व्वधर्म्मस्वभावसमताविपञ्चितस्य समाधेर्लाभिनो भवेम इति । तेन खलु पुनः समयेन गृध्रकूटपर्व्वते भगवतः सागरोपमायां पर्षदि धर्म्मं देशयतः पञ्चशिखो नाम गन्धर्व्वपुत्रः पञ्चभिस्तूर्य्यशतैः सार्द्धं गगणतलादवतीर्य्य भगवतः पुरतः स्थितोऽभूदुपस्थानपरिचर्य्यायै ॥

अथ खलु पञ्चशिखस्य गन्धर्व्वपुत्रस्यैतदभवत् । यदहं यथैव देवानां त्रयस्त्रिंशानां

शक्रस्य च देवानामिन्द्रस्य सुधर्म्मायां देवसभायां उपस्थानपरिचर्य्यां करोमि । सङ्गीतिं सम्प्रयोजयामि । तथैवास्य देवाधिदेवस्यापि तथागतस्यार्हतः सम्यक्सम्बुद्धस्य पूजायै सङ्गीतिं सम्प्रयोजयेयं । अथ खलु पञ्चशिखो गन्धर्व्वपुत्रस्तैः पञ्चभिस्तूर्य्यशतैः सार्द्धं एकस्वरं प्रयुक्तैः तूर्य्यतन्त्रीवीणा स्वयंवदाय भगवतः पुरतो वादयामास । अथ खलु भगवत एतदभूत् । यदहं तथारूपमृद्ध्यभिसंस्कारमभिसंस्कुर्य्यां । यथारूपेण ऋध्यभिसंस्कारेणाभिसंस्कृतेन चन्द्रप्रभः कुमारभूतः अचिन्त्यं बुद्धधर्म्मनिध्यप्तिकौशलमधिगच्छेत । सर्व्वधर्म्मस्वभावषमताविपञ्चिताश्च समाधेर्न चलेत पञ्चशिखस्य गन्धर्व्वपुत्रस्य तन्त्रीस्वरगीतिस्वरकौशल्यमुपदिशेयं ॥

अथ खलु भगवांस्तथारूपमृद्ध्यभिसंस्कारमभिसंस्करोति स्म । यस्तेभ्यः पञ्चभ्यस्तूर्य्यशतेभ्यः सुसंप्रयुक्तेभ्यः सम्प्रवादितेभ्यो यथाचिन्त्यार्थोपसंहितः शब्दो निश्चरति धर्म्मताप्रतिसंयुक्तः । इमाश्चाचिन्त्यबुद्धधर्म्मनिध्यप्तिगाथा निश्चरन्ति स मे बुद्धानुभावेन ।

एकहि वाल यथेदस्तु बुद्धा चान्तिक वालिक गङ्गनदीये ।
क्षेत्र पितान्तक तेष जिनानां तेच विलक्षण विसभागाः ॥
पञ्चगतीगत वालपर्थाश्च नैरयिकापि च तीर्य्यगताश्च ।
ते यमलौकिक देवमनुष्या नोपि च सकरणो चउ पीड़ा ॥
तव पदेश्चसराः ससमुद्राः सर्व्वनदी तथ उत्स तड़ागाः ।
नोपि च सकरणो चउ पीड़ा एवमचिन्तिय धर्म्म जिनानां ॥
तत्र पदेऽपि च पर्व्व नेके चक्रवाड़ अपि मेरु सुमेरु ।
ये मुचिलिन्द्र महामुचिलिन्द्राः विन्ध्याथ गृध्रकूटो हिमवांश्च ॥
तत्र पदे निरयाश्च सुघोराः तपनप्रतापत आनभिरम्याः ।
तत्र च ये निरये उपपन्नाः वेदन तेऽपि दुःखमनुभोन्ति ॥
तत्र पदेपि च देव विमानाष्टादशयोजन ते रमणीयाः ।
ते च बहुमरुतान सहस्रा दिव्यरती सुसुखान्यनुभोन्ति ॥
तत्र पदे च बुद्धान उत्पादो सासन लोक विदुन ज्वलानि ।
तञ्च न पश्यति ज्ञानविहीनो येन न शोधितचर्य्यविशुद्धाः ॥
तत्र पदेऽपि च धर्म्म निरुद्धो निर्वृतु नायकु श्रूयति शब्दः ।
तत्र पदेऽपि च कोचि शृणोन्ती तिष्ठुति नायकु भाषति धर्म्मं ॥
तत्र पदेऽपि च केषचिदायु वर्ष अचिन्तिय वर्त्तति संज्ञा ।
तत्र पदेऽपि च कालु करोन्ती नोचरु जीवति श्रूयति शब्दः ॥
तत्र पदेऽपि च केषचि संज्ञा दृष्ट तथागतु पूजितु बुद्धो ।
तोषि सुमानसु संज्ञप्रहेणो नोपि च पूजितु नोच प्रसन्नो ॥
स्वस्ति गृहेसुपि नैव मनुष्यो कामगुणेसु रतौ मनुभूय ।
स प्रतिबुद्ध न पश्यति कामांस्तञ्च प्रजानयति सुपिनोति ॥